# मिलिन्दपञ्हो

## [ मिलिन्दप्रश्नः ]

(मूलपालिसंस्कृतच्छायासंवलितः)

संस्कृतच्छायाकारः
जगन्नाथपाठकः

प्रकाशक :

**मोतीलाल बनारसीदास**

वाराणसी, दिल्ली, पटना

प्रकाशक

सुन्दर लाल जैन

मोतीलाल बनारसीदास

पो० बा० ७५, नेपाली खपड़ा वाराणसी

सर्वाधिकार सुरक्षित

मूल्य ४ रु०

मुद्रक

गौरीशंकर प्रेस,

मध्यमेश्वर, वाराणसी–१

ग्रीसेषु जातो नृपतिर्मिलिन्दः
शास्ता समग्रोत्तरभारतस्य ।
उपागमत् प्रश्नविनोदनार्थं
स नागसेनं स्थविरं कदाचित् ॥

प्रश्नान् बहूनेव स वादिधुर्यः
पप्रच्छ भिक्षुं विदितोत्तमार्थम् ।
क्रमेण सर्वान् स निनाय भिन्नान्
'मिलिन्दप्रश्नो'ऽयमिति प्रसिद्धः ॥

गजहयरथपत्तिसमाकुलं अभिरूपनरनारीगणानुचरितं आकिण्णजनमनुस्सं पुथुखत्तियब्राह्मणवेस्ससुद्दं विविधसमणब्राह्मणसभाजनसङ्घटितं बहुविधविज्जावन्तनरवीरनिसेवितं कासिककोटुम्बरकादिनानाविधवत्थापणसम्पन्नं सुप्पसारितरुचिरबहुविधपुप्फगन्धापणगंधगन्धितं आसिसनियबहुरतनपरिपूरितं दिसामुखसुप्पसारितापणसिङ्गारवाणिजगणा'नुचरितं कहापणरजतसुवण्णकंसपत्थरपरिपूरं पज्जोतमाननिधिनिकेतं पहूतधनधञ्ञवित्तू'पकरणं परिपुण्णकोसकोट्ठागारं बहुअन्नपानं बहुविधखज्जभोज्जलेय्यपेय्यसायनीयं उत्तरकुरुसङ्कासं सम्पन्नसस्सं आळकमन्दा विय देवपुरं ।

एत्थ ठत्वा तेसं पुब्बकम्मं कथेतब्बं । कथेन्तेन च छद्धा विभजित्वा कथेतब्बं । सेय्यथी'दं–( १ ) पुब्बयोगो, ( २ ) मिलिन्दपञ्हं, ( ३ ) लक्खणपञ्हं, ( ४ ) मेण्डकपञ्हं, ( ५ ) अनुमानपञ्हं, ( ६ ) ओपम्मकथापञ्हं'–ति । तत्थ मिलिन्दपञ्हो ( क ) लक्खणपञ्हो ( ख ) विमतिच्छेदनपञ्हो' ति दुविधो । मेण्डकपञ्हो पि (क) महावग्गो (ख) योगिकथापञ्हो' ति दुविधो ।

बाहिरकथा

गजहयरथपत्तिसमाकुलं अभिरूपनरनारीगणानुचरितं आकीर्णजनमनुष्यं पृथुक्षत्रियब्राह्मणवैश्यशूद्रं विविधश्रमणब्राह्मणसभाजनसङ्घटितं बहुविधविद्यावन्नरवीरनिषेवितं काशिककौटुम्बरकादिनानाविधवस्त्रापणसम्पन्नं सुप्रसारितरुचिरबहुविधपुष्पगन्धापणगन्धगन्धितं आशंसनीयबहुरत्नपरिपूरितं दिशामुखसुप्रसारितापणशृङ्गारवणिग्गणानुचरितं कार्षापणरजतसुवर्णकांस्यप्रस्तरपरिपूरं प्रद्योतमाननिधिनिकेतं प्रभूतधनधान्यवित्तोपकरणं परिपूर्णकोशकोष्ठागारं बह्वन्नपानं बहुविधखाद्यभोज्यलेह्यपेयस्वादनीयं उत्तरकुरुसङ्काशं सम्पन्नसस्यं आलकमन्देव देवपुरम् ।

अत्र स्थित्वा तयो पूर्वकर्म कथयितव्यम्। कथयता च षड्धा विभज्य कथयितव्यम् । तद् यथेद–( १ ) पूर्वयोग., ( २ ) मिलिन्दप्रश्न:, ( ३ ) लक्षणप्रश्न., ( ४ ) मेपप्रश्न., ( ५ ) अनुमानप्रश्न., ( ६ ) औपम्यकथाप्रश्न इति । तत्र मिलिन्दप्रश्नः ( क ) लक्षणप्रश्नो ( ख ) विमतिच्छेदनप्रश्न इति द्विविध । मेपप्रश्नोऽपि ( क ) महावर्गो ( ख ) योगिकथाप्रश्न इति द्विविधः ।

बाह्यकथा

# पठमो परिच्छेदो

## १. पुब्बयोगो

### १—तेसं पुब्बजातिकथा

पुब्बयोगो'ति तेसं पुब्बकम्मं ।

अतीते किर कस्सपस्स भगवतो सासने वत्तमाने गङ्गाय समीपे एकस्मिं आवासे महाभिक्खुसङ्घो पटिवसति । तत्थ वत्तसीलसम्पन्ना भिक्खू पातो'व उट्ठाय यट्ठिसम्मज्जनियो आदाय बुद्धगुणे आवज्जन्ता अङ्गणं सम्मज्जित्वा कचवरब्यूहं करोन्ति । अथे'को भिक्खु एकं सामणेरं "एहि, सामणेर, इमं कचवरं छड्डेही"'ति आह । सो असुणन्तो विय गच्छति । सो दुतियम्पि ततियम्पि आमन्तियमानो असुणन्तो विय गच्छते'व । ततो सो भिक्खु "दुब्बचो वतायं सामणेरो"'ति कुद्धो सम्मज्जनिदण्डेन पहारं अदासि । ततो सो रोदन्तो भयेन कचवरं छड्डेन्तो "इमिना'हं कचवरछड्डनपुञ्ञकम्मेन यावा'हं निब्बाणं पापुणामि एत्थ'न्तरे निब्बत्तनिब्बत्तट्ठाने मज्झन्हिकसुरियो विय महेसक्खो महातेजो भवेय्यं"'ति पठमपत्थनं पट्ठपेसि । कचवरं छड्डेत्वा नहान'त्थाय गङ्गातित्थं गतो गङ्गाय ऊमिवेगं गग्गरायमानं दिस्वा "यावा'हं निब्बानं पापुणामि एत्थ'न्तरे निब्बत्तनिब्बत्तट्ठाने अयं ऊमिवेगो विय ठानुप्पत्तिकपटिभानो भवेय्यं अक्खयपटिभानो"'ति दुतियम्पि पत्थनं पट्ठपेसि ।

सो पि भिक्खु सम्मज्जनिसालाय सम्मज्जनिं ठपेत्वा नहान'त्थाय गङ्गातित्थं गच्छन्तो सामणेरस्स पत्थनं सुत्वा "एस मया

# प्रथमः परिच्छेदः

## १. पूर्वयोगः

### १—तयोः पूर्वजातिकथा

पूर्वयोग इति तयोः पूर्वकर्म ।

अतीते किल काश्यपस्य भगवतः शासने वर्तमाने गङ्गायाः समीपे एकस्मिन्नावासे महाभिक्षुसङ्घः प्रतिवसति । तत्र व्रतशीलसम्पन्ना भिक्षवः प्रातरेवोत्थाय यष्टिसम्मार्जनीरादाय बुद्धगुणाननुस्मरन्तोऽङ्गणं सम्मार्ज्य कचवरव्यूहं कुर्वन्ति । अथैको भिक्षुरेकं श्रामणेरं "एहि, श्रामणेर, इदं कचवरं छर्दय" इत्याह । सोऽश्रुतकेनेव गच्छति । स द्वितीयमपि तृतीयमप्यामन्त्र्यमाणोऽश्रुतकेनेव गच्छत्येव । ततः स भिक्षुः "दुर्वचो बतायं श्रामणेर" इति क्रुद्धः सम्मार्जनीदण्डेन प्रहारमदात् । ततः स रुदन् भयेन कचवरं छर्दयन् "अनेनाहं कचवरछर्दनपुण्यकर्मणा यावदहं निर्वाणं प्राप्नोमि अत्रान्तरे निर्वृत्तनिर्वृत्तस्थाने मध्याह्निकसूर्य इव महाशक्तो महातेजा भवेय" मिति प्रथमप्रार्थना प्रातिष्ठिपत् । कचवरं छर्दयित्वा स्नानार्थाय गङ्गातीर्थं गतो गङ्गाया ऊर्मिवेगं गर्गरायमाणं दृष्ट्वा "यावदहं निर्वाणं प्राप्नोमि अत्रान्तरे निर्वृत्तनिर्वृत्तस्थानेऽयमूर्मिवेग इव स्थानोत्पत्तिकप्रतिभानो भवेयमक्षयप्रतिभान" इति द्वितीयामपि प्रार्थना प्रातिष्ठिपत् ।

सोऽपि भिक्षुः सम्मार्जनीशालाया सम्मार्जनी स्थापयित्वा स्नानार्थाय गङ्गातीर्थं गच्छन् श्रामणेरस्य प्रार्थना श्रुत्वा "एष मया

पयोजितो पि ताव एवं पत्थेति, "मग्हं कि न समिज्झिस्सती"ति चिन्तेत्वा "याव'हं निब्बाणं पापुणामि एत्थंतरे निब्बत्तनिब्बत्तट्ठाने अयं गङ्गाऊमिवेगो विय अक्खयपटिभानो भवेय्यं, इमिना पुच्छितपुच्छितं सब्बं पञ्हपटिभानं विजटेतुं निब्बेठेतुं समत्थो भवेय्यं"ति पत्थनं पट्ठपेसि।

ते उभो पि देवेसु च मनुस्सेसु च संसरन्ता एकं बुद्धन्तरं खेपेसुं। अथ अम्हाकं भगवता पि "यथा मोग्गलिपुत्ततिस्सत्थेरो दिस्सति, एवमे'तेपि दिस्सन्ति, मम परिनिब्बानतो पञ्चवस्ससते अतिक्कंते एते उप्पज्जिस्सन्ति। यं मया सुखुमं कत्वा देसितं धम्मविनयं, तं एते पञ्हपुच्छनओपम्मयुत्तिवसेन निज्जटं निग्गुम्बं कत्वा विभजिस्सन्ती"ति निद्दिट्ठा।

तेसु सामणेरो जम्बुदीपे सागलनगरे मिलिन्दो नाम राजा अहोसि पण्डितो ब्यत्तो मेधावी पटिबलो। अतीता'नागतपच्चुप्पन्नानं समन्तयोगविधानक्रियानं करणकाले निसम्मकारी होति। बहूनि च'स्स सत्थानि उग्गहितानि होन्ति; सेय्यथी'दं—सुति, सम्मुति, संख्या, योगो, नीति, विसेसिका, गणिका, गन्धब्बा, तिकिच्छा, धनुब्बेदा, पुराणा, इतिहासा, जोतिसा, माया, हेतु, मन्तना, युद्धा, छन्दसा, मुद्दा, वचनेन एकूनवीसति। वितण्डवादी दुरासदो दुप्पसहो पुथुतित्थकरानं अग्गम'क्खायति। सकलजम्बुदीपे मिलिन्देन रञ्ञा समो कोचि ना'होसि, यदि'दं थामेन जवेन सूरेन पञ्ञाय अड्ढो महद्धनो महाभोगो अनन्तबलवाहनो।

अथे'कदिवसं मिलिन्दो राजा अनन्तबलवाहनं चतुरङ्गिनि बलग्गसेनाब्यूहं दस्सनकम्यताय नगरा निक्खमित्वा बहिनगरे सेनागणनं कारेत्वा सो राजा भस्सप्पवादको लोकायतवितण्ड-

प्रयोजितोऽपि तावदेवं प्रार्थयति "मह्यं किं न स समर्त्स्यती"ति चिन्तयित्वा "यावदहं निर्वाणं प्राप्नोमि अत्रान्तरे निर्वृत्तनिर्वृत्तस्थानेऽयं गङ्गोर्मिवेग इवाक्षयप्रतिभानो भवेयं, अनेन पृष्टपृष्टं सर्वं प्रश्नप्रतिभानं विजटयितुं निर्वेष्टयितुं समर्थो भवेय"मिति प्रार्थनां प्रातिष्ठिपत्।

तावुभावपि देवेषु च मनुष्येषु च संसरन्तावेकं बुद्धान्तरमक्षैप्ताम्। अथास्माकं भगवताऽपि "यथा मौद्गलिपुत्रतिष्यस्थविरौ दृश्येते एवमेतावपि दृश्येते, मम परिनिर्वाणात् पञ्चवर्षशतेऽतिक्रान्ते एतावुत्पत्स्येते। यन्मया सूक्ष्मं कृत्वा देशितं धर्मविनयं, तदेतौ प्रश्नपृच्छौपम्ययुक्तिवशेन निर्जटं निर्गुल्मं कृत्वा विभक्ष्यत"इति निर्दिष्टौ।

तयो श्रामणेरो जम्बुद्वीपे शागलनगरे मिलिन्दो नाम राजाऽभूत् पण्डितो व्यक्तो मेधावी प्रतिबलः। अतीतानागतप्रत्युत्पन्नाना समन्त्रयोगविधानक्रियाणा करणकाले निशाम्यकारी भवति। बहूनि चास्य शास्त्राणि उद्गृहीतानि भवन्ति; तद्यथेदम्—श्रुतिः, स्मृतिः, संख्या, योगः, नीतिः, वैशेषिकं, गणिका, गान्धर्वं, चिकित्सा, धनुर्वेदाः, पुराणानि, इतिहासाः, ज्यौतिषं, माया, हेतुः, मन्त्रणा, युद्धम्, छन्दः, मुद्रा, वचनेनैकोनविंशतिः। वितण्डावादी दुरासदो दुष्प्रसहः पृथुतीर्थकराणामग्र्य आख्यायते। सकलजम्बुद्वीपे मिलिन्देन राज्ञा समः कश्चिन्नाभूत् योऽयं स्थाम्ना जवेन शौर्येण प्रज्ञयाऽऽढ्यो महाधनो महाभोगोऽनन्तबलवाहनः।

अथैकदिवसं मिलिन्दो राजाऽनन्तबलवाहना चतुरङ्गिणी बलाग्र्यसेनाव्यूहं दर्शनकाम्यतया नगरान्निष्क्रम्य बहिर्नगरे सेनागणनां कारयित्वा स राजा भाष्यप्रवादको लोकायतवैतण्ड-

जनसल्लापप्पवत्तकोतूहलो सूरियं ओलोकेत्वा अमच्चे आमन्तेसि– "बहु ताव दिवसा'वसेसो । किं करिस्साम इदाने'व नगरं पविसित्वा ? अत्थि को पि पण्डितो समणो वा ब्राह्मणो वा सङ्घी गणी गणाचरियो, अपि अरहन्तं सम्मासम्बुद्धं पटिजानमानो, यो मया सद्धिं सल्लपितुं सक्कोति कङ्खं पटिविनोदेतुं"ति ?

एवं वुत्ते पञ्चसता योनका राजानं मिलिन्दं एतदवोचुं– "अत्थि, महाराज, छ सत्थारो–पूरणो कस्सपो, मक्खलि गोसालो, निगन्थो नातपुत्तो, सञ्जयो बेलट्ठपुत्तो, अजितो केसकम्बलो, पकुधो कच्चायनो । ते सङ्घिनो गणिनो गणाचरियका ञाता यसस्सिनो तित्थकरा, साधुसम्मता बहुजनस्स । गच्छ त्वं, महाराज, ते पञ्हं पुच्छस्सु, कङ्खं पटिविनोदेही"ति ।

## २—पूरणेन कस्सपेन मिलिन्दस्स समागमो

अथ खो मिलिन्दो राजा पञ्चहि योनकसतेहि परिवुतो भद्रवाहनं रथवरमारुय्ह येन पूरणो कस्सपो तेनुपसङ्कमि । उपसङ्कमित्वा पूरणेन कस्सपेन सद्धिं सम्मोदि । सम्मोदनीयं कथं सारणीयं वीतिसारेत्वा एकमन्तं निसीदि । एकमन्तं निसिन्नो खो मिलिन्दो राजा पूरणं कस्सपं एतदवोच– "को, भन्ते कस्सप, लोकं पालेती"ति ?

"पथवी, महाराज, लोकं पालेती"ति ।

"यदि, भन्ते कस्सप, पथवी लोकं पालेति, अथ कस्मा अवीचिनिरयं गच्छन्ता सत्ता पथविं अतिक्कमित्वा गच्छन्ती"ति ? एवं वुत्ते पूरणो कस्सपो नेव सक्खि ओगिलितुं नेव सक्खि उग्गिलितुं । पत्तक्खन्धो तुण्हीभूतो पज्झायन्तो निसीदि ।

जनसंलापप्रवृत्तकौतूहलः सूर्यमवलोक्यामात्यानाममन्त्रत—"बहुस्तावद् दिवसावशेषः। किं करिष्याम इदानीमेव नगरं प्रविश्य? अस्ति कोऽपि पण्डितः श्रमणो वा ब्राह्मणो वा सङ्घी गणी गणाचार्यः अप्यर्हन्तं सम्यक्सम्बुद्धं प्रतिजानानः, यो मया सार्धं संलपितुं शक्नोति शङ्कां प्रतिविनोदयितु"मिति?

एवमुक्ते पञ्चशता यवनका राजानं मिलिन्दमेतदवोचन्—"सन्ति, महाराज, षट् शास्तारः—पूरणः काश्यपः, मस्करी गोशालः, निर्ग्रन्थो ज्ञातपुत्रः, सञ्जयो वैरट्टिपुत्रः, अजितः केश-कम्बली, प्रक्रुद्धः कात्यायनः। ते सङ्घिनो गणिनो गणाचार्यका ज्ञाता यशस्विनस्तीर्थकराः साधुसम्मता बहुजनस्य। गच्छ त्वं, महाराज, तान् प्रश्नं पृच्छ, काङ्क्षां प्रतिविनोदये"ति।

## २—पूरणेन काश्यपेन मिलिन्दस्य समागमः

अथ खलु मिलिन्दो राजा पञ्चभिर्यवनकशतैः परिवृतो भद्रवाहनं रथवरमारुह्य येन पूरणः काश्यपस्तेनोपसमक्रमीत्। उपसङ्क्रम्य पूरणेन काश्यपेन सार्धं सममोदिष्ट। सम्मोदनीयां कथां सारणीयां व्यतिसार्य एकान्ते न्यषदत्। एकान्ते निषण्णः खलु मिलिन्दो राजा पूरणं काश्यपमेतदवोचत्—"को, भदन्त काश्यप, लोकं पालयती"ति?

"पृथिवी, महाराज, लोकं पालयती"ति।

"यदि, भदन्त काश्यप, पृथिवी लोकं पालयति, अथ कस्मादवीचिनरकं गच्छन्तः सत्त्वाः पृथिवीमतिक्रम्य गच्छन्ती"ति? एवमुक्ते पूरणः काश्यपो नैवाशकदवगिलितुं नैवाशकदुद्गिलितुम्। पतितस्कन्धस्तूष्णीम्भूतः प्रध्यायन् न्यषदत्।

## ३—मक्खलिगोसालेन मिलिन्दस्स समागमो

अथ खो मिलिन्दो राजा मक्खलिं गोसालं एतदवोच—"अत्थि, भन्ते गोसाल, कुसलाकुसलानि कम्मानि ? अत्थि सुकतदुक्कटानं फलं विपाको"ति ?

"नत्थि, महाराज, कुसलाकुसलानि कम्मानि । नत्थि सुकतदुक्कटानं कम्मानं फलं विपाको । ये ते, महाराज, इधलोके खत्तिया ते परलोकं गन्त्वापि पुन खत्तिया व भविस्सन्ति । ये ते ब्राह्मणा वेस्सा सुद्दा चण्डाला पुक्कुसा ते परलोकं गन्त्वापि पुन ब्राह्मणा वेस्सा सुद्दा चण्डाला पुक्कुसा व भविस्सन्ति । किं कुसलाकुसलेहि कम्मेही"ति ।

"यदि, भन्ते गोसाल, इधलोके खत्तिया ब्राह्मणा वेस्सा सुद्दा चण्डाला पुक्कुसा ते परलोकं गन्त्वा'पि पुन खत्तिया ब्राह्मणा वेस्सा सुद्दा चण्डाला पुक्कुसा भविस्सन्ति, नत्थि कुसलाकुसलेहि कम्मेहि करणीयं, तेन हि, भन्ते गोसाल, ये ते इधलोके हत्थच्छिन्ना ते परलोकं गन्त्वा पि पुन हत्थच्छिन्ना व भविस्सन्ति, ये पादच्छिन्ना ते पादच्छिन्ना व भविस्सन्ति ये कण्णनासच्छिन्ना ते कण्णनासच्छिन्ना व भविस्सन्ती"ति । एवं वुत्ते गोसालो तुण्ही अहोसि ।

अथ खो मिलिन्दस्स रञ्ञो एतदहोसि—"तुच्छो बत भो जम्बुदीपो, पलापो बत भो जम्बुदीपो । नत्थि कोचि समणो वा ब्राह्मणो वा यो मया सद्धिं सल्लपितुं सक्कोति कङ्खं पटिविनोदेतुं"ति । अथ खो मिलिन्दो राजा अमच्चे आमन्तेसि—"रमणीया बत भो दोसिना रत्ति । कं नु ख्वज्ज समणं वा ब्राह्मणं वा उपसङ्कमेय्याम पञ्हं पुच्छितुं ? को मया सद्धिं

## ३—मस्करिगोशालेन मिलिन्दस्य समागमः

अथ खलु मिलिन्दो राजा मस्करिणं गोशालमेतदवोचत्—"सन्ति, भदन्त गोशाल, कुशलाकुशलानि कर्माणि ? अस्ति सुकृतदुष्कृतानां फलं विपाक" इति ?

"न सन्ति, महाराज, कुशलाकुशलानि कर्माणि । नास्ति सुकृतदुष्कृतानां कर्मणां फलं विपाकः । ये ते, महाराज, इहलोके क्षत्रियास्ते परलोकं गत्वाऽपि पुनः क्षत्रिया एव भविष्यन्ति । ये ते ब्राह्मणा वैश्याः शूद्राश्चण्डालाः पुल्कसास्ते परलोकं गत्वाऽपि पुनर्ब्राह्मणा वैश्याः शूद्राश्चण्डालाः पुल्कसा एव भविष्यन्ति । किं कुशलाकुशलैः कर्मभि"रिति ।

"यदि, भदन्त गोशाल, इहलोके क्षत्रिया ब्राह्मणा वैश्याः शूद्राश्चण्डालाः पुल्कसास्ते परलोकं गत्वाऽपि पुनः क्षत्रिया ब्राह्मणा वैश्याः शूद्राश्चण्डालाः पुल्कसा भविष्यन्ति, नास्ति कुशलाकुशलैः कर्मभिः करणीयम्, तेन हि, भदन्त गोशाल, ये ते इहलोके हस्तच्छिन्नास्ते परलोकं गत्वाऽपि पुनर्हस्तच्छिन्ना एव भविष्यन्ति, ये पादच्छिन्नास्ते पादच्छिन्ना एव भविष्यन्ति, ये कर्णनासच्छिन्नास्ते कर्णनासच्छिन्ना एव भविष्यन्ती"ति । एवमुक्ते गोशालस्तूष्णीमभूत् ।

अथ खलु मिलिन्दस्य राज्ञ एतदभूत्—"तुच्छो बत भो जम्बुद्वीपः, प्रलापो बत भो जम्बुद्वीपः । नास्ति कश्चिच्छ्रमणो वा ब्राह्मणो वा यो मया सार्धं संलपितुं शक्नोति शङ्का प्रतिविनोदयितु"मिति । अथ खलु मिलिन्दो राजाऽमात्यानाममन्त्रत—"रमणीया बत भो ज्योत्स्ना रात्रिः । कं नु खल्वद्य श्रमणं वा ब्राह्मणं वोपसंक्रामयेम प्रश्नं प्रष्टुम् ? को मया सार्धं

## ३—मक्खलिगोसालेन मिलिन्दस्स समागमो

अथ खो मिलिन्दो राजा मक्खलिं गोसालं एतदवोच—"अत्थि, भन्ते गोसाल, कुसलाकुसलानि कम्मानि ? अत्थि सुकतदुक्कटानं फलं विपाको"ति ?

"नत्थि, महाराज, कुसलाकुसलानि कम्मानि । नत्थि सुकतदुक्कटानं कम्मानं फलं विपाको । ये ते, महाराज, इधलोके खत्तिया ते परलोकं गन्त्वापि पुन खत्तिया व भविस्सन्ति । ये ते ब्राह्मणा वेस्सा सुद्दा चण्डाला पुक्कुसा ते परलोकं गन्त्वापि पुन ब्राह्मणा वेस्सा सुद्दा चण्डाला पुक्कुसा व भविस्सन्ति । किं कुसलाकुसलेहि कम्मेही"ति ।

"यदि, भन्ते गोसाल, इधलोके खत्तिया ब्राह्मणा वेस्सा सुद्दा चण्डाला पुक्कुसा ते परलोकं गन्त्वा' पि पुन खत्तिया ब्राह्मणा वेस्सा सुद्दा चण्डाला पुक्कुसा भविस्सन्ति, नत्थि कुसलाकुसलेहि कम्मेहि करणीयं, तेन हि, भन्ते गोसाल, ये ते इधलोके हत्थच्छिन्ना ते परलोकं गन्त्वा पि पुन हत्थच्छिन्ना व भविस्सन्ति, ये पादच्छिन्ना ते पादच्छिन्ना व भविस्सन्ति ये कण्णनासच्छिन्ना ते कण्णनासच्छिन्ना व भविस्सन्ती"ति । एवं वुत्ते गोसालो तुण्ही अहोसि ।

अथ खो मिलिन्दस्स रञ्ञो एतदहोसि—"तुच्छो वत भो जम्बुदीपो, पलापो वत भो जम्बुदीपो । नत्थि कोचि समणो वा ब्राह्मणो वा यो मया सद्धिं सल्लपितुं सक्कोति कङ्खं पटिविनोदेतुं"ति । अथ खो मिलिन्दो राजा अमच्चे आमन्तेसि—"रमणीया वत भो दोसिना रत्ति । कं नु ख्वज्ज समणं वा ब्राह्मणं वा उपसङ्कमेय्याम पञ्हं पुच्छितुं ? को मया सद्धिं

### ३—मस्करिगोशालेन मिलिन्दस्य समागमः

अथ खलु मिलिन्दो राजा मस्करिणं गोशालमेतदवोचत्—"सन्ति, भदन्त गोशाल, कुशलाकुशलानि कर्माणि ? अस्ति सुकृतदुष्कृतानां फलं विपाक" इति ?

"न सन्ति, महाराज, कुशलाकुशलानि कर्माणि । नास्ति सुकृतदुष्कृतानां कर्मणां फलं विपाकः । ये ते, महाराज, इहलोके क्षत्रियास्ते परलोकं गत्वाऽपि पुनः क्षत्रिया एव भविष्यन्ति । ये ते ब्राह्मणा वैश्या शूद्राश्चण्डाला पुल्कसास्ते परलोकं गत्वाऽपि पुनर्ब्राह्मणा वैश्याः शूद्राश्चण्डाला पुल्कसा एव भविष्यन्ति । किं कुशलाकुशलैः कर्मभि"रिति ।

"यदि, भदन्त गोशाल, इहलोके क्षत्रिया ब्राह्मणा वैश्याः शूद्राश्चण्डाला पुल्कसास्ते परलोकं गत्वाऽपि पुनः क्षत्रिया ब्राह्मणा वैश्या शूद्राश्चण्डालाः पुल्कसा भविष्यन्ति, नास्ति कुशलाकुशलैः कर्मभिः करणीयम्, तेन हि, भदन्त गोशाल, ये ते इहलोके हस्तच्छिन्नास्ते परलोकं गत्वाऽपि पुनर्हस्तच्छिन्ना एव भविष्यन्ति, ये पादच्छिन्नास्ते पादच्छिन्ना एव भविष्यन्ति, ये कर्णनासच्छिन्नास्ते कर्णनासच्छिन्ना एव भविष्यन्ती"ति । एवमुक्ते गोशालस्तूष्णीमभूत् ।

अथ खलु मिलिन्दस्य राज्ञ एतदभूत्—"तुच्छो बत भो जम्बुद्वीप, प्रलापो बत भो जम्बुद्वीपः ! नास्ति कश्चिच्छ्रमणो वा ब्राह्मणो वा यो मया सार्धं संलपितुं शक्नोति शङ्का प्रतिविनोदयितु"मिति । अथ खलु मिलिन्दो राजाऽमात्यानाममन्त्रत—"रमणीया बत भो ज्योत्स्ना रात्रिः । कं नु खल्वद्य श्रमणं वा ब्राह्मणं वोपसंक्रामयेम प्रश्नं प्रष्टुम् ? को मया सार्धं

सल्लपितुं सक्कोति, कङ्खं पटिविनोदेतुं''ति ? एवं वुत्ते अमच्चा तुण्हीभूता रञ्ञो मुखं आलोकयमाना अट्ठंसु ।

तेन खो पन समयेन सागलनगरं द्वादस वस्सानि सुञ्ञं अहोसि समणब्राह्मणगहपतिपण्डितेहि । यत्थ समणब्राह्मणगहपतिपण्डिता पटिवसन्ती'ति सुणाति, तत्थ गन्त्वा राजा ते पञ्हं पुच्छति । ते सब्बेपि पञ्हाविस्सज्जनेन राजानं आराधेतुं असक्कोन्ता येन वा तेन वा पक्कमन्ति । ये अञ्ञं दिसं न पक्कमन्ति ते सब्बे तुण्हीभूता अच्छन्ति । भिक्खू पन येभुय्येन हिमवन्तमेव गच्छन्ति । तेन खो पन समयेन कोटिसता अरहन्तो हिमवन्ते पब्बते रक्खिततले पटिवसन्ति ।

## ४—आयस्मता अस्सगुत्तेन भिक्खुसंघो संनिपातितो

अथ खो आयस्मा अस्सगुत्तो दिब्बाय सोतधातुया मिलिन्दस्स रञ्ञो वचनं सुत्वा युगन्धरमत्थके भिक्खुसङ्घं सन्निपातेत्वा भिक्खू पुच्छि—''अत्था'वुसो, कोचि भिक्खु पटिबलो मिलिन्देन रञ्ञा सद्धिं सल्लपेतुं कङ्खं पटिविनोदेतुं''ति ? एवं वुत्ते कोटिसता अरहन्तो तुण्ही अहेसुं । दुतियम्पि, ततियम्पि खो पुट्ठा तुण्ही अहेसुं । अथ खो आयस्मा अस्सगुत्तो भिक्खुसङ्घं एतदवोच—''अत्था, वुसो, तावतिंसभवने वेजयन्तस्स पाचीनतो केतुमती नाम विमानं । तत्थ महासेनो नाम देवपुत्तो पटिवसति । सो पटिबलो तेन मिलिन्देन सल्लपेतुं, कङ्खं पटिविनोदेतुं''ति ।

## ५—महासेनं देवपुत्तं इधागमनाय याचेसि

अथ खो कोटिसता अरहन्तो युगन्धरपब्बते अन्तरहिता तावतिंसभवने पातुरहेसुं । अद्दसा खो सक्को देवानमिन्दो ते भिक्खू

संलपितुं शक्नोति, शङ्का प्रतिविनोदयितु''मिति ? एवमुक्तेऽमात्या-स्तूष्णीम्भूता राज्ञो मुखमालोकयन्तोऽस्थुः ।

तेन खलु पुनः समयेन सागलनगरं द्वादश वर्षाणि शून्य-मभूच्छ्रमणब्राह्मणगृहपतिपण्डितैः । यत्र श्रमणब्राह्मणगृहपति-पण्डिता प्रतिवसन्तीति श्रूयते, तत्र गत्वा राजा तान् प्रश्नं पृच्छति । ते सर्वेऽपि प्रश्नाविसर्जनेन राजानमाराधयितुमशक्नु-वन्तो येन वा तेन वा प्रक्रामन्ति । येऽन्या दिशं न प्रक्रामन्ति, ते सर्वे तूष्णीम्भूतास्तिष्ठन्ति । भिक्षवः पुनर्भूयसा (?) हिमवन्तमेव गच्छन्ति । तेन खलु पुनः समयेन कोटिशता अर्हन्तो हिमवति पर्वते रक्षिततले प्रतिवसन्ति ।

## ४—आयुष्मताऽश्वगुप्तेन भिक्षुसङ्घः संनिपातितः

अथ खलु आयुष्मानश्वगुप्तो दिव्येन श्रोत्रधातुना मिलिन्दस्य राज्ञो वचनं श्रुत्वा युगन्धरमस्तके भिक्षुसङ्घं सन्निपात्य भिक्षून-प्राक्षीत्–''अस्ति, आयुष्मन्तः, कश्चिद् भिक्षुः प्रतिबलो मिलिन्देन राज्ञा सार्धं संलपितुं शङ्का प्रतिविनोदयितु'' मिति ? एवमुक्ते कोटि-शता अर्हन्तस्तूष्णीमभूवन् । द्वितीयमपि, तृतीयमपि खलु पृष्टास्तूष्णी-मभूवन् । अथ खलु आयुष्मानश्वगुप्तो भिक्षुसङ्घमेतदवोचत्–''अस्ति, आयुष्मन्, त्रायस्त्रिंशभवने वैजयन्तस्य प्राचीनतः केतुमती नाम विमानम् । तत्र महासेनो नाम देवपुत्रः प्रतिवसति । स प्रतिबलस्तेन मिलिन्देन संलपितुं, शङ्का प्रतिविनोदयितु'' मिति ।

## ५—महासेनदेवपुत्रमिहागमनायायाचिष्ट

अथ खलु कोटिशता अर्हन्तो युगन्धरपर्वतेऽन्तर्हितास्त्रायस्त्रिंश-भवने प्रादुरभूवन् । अदर्शत् खलु शक्रो देवानामिन्द्रस्तान् भिक्षून्

दूरतो व आगच्छन्ते। दिस्वान येन आयस्मा अस्सगुत्तो तेनुपसङ्कमि। उपसङ्कमित्वा आयस्मन्तं अस्सगुत्तं अभिवादेत्वा एकमन्तं अट्ठासि।

एकमन्तं ठितो खो सक्को देवानमिन्दो आयस्मन्तं अस्सगुत्तं एतदवोच—“महा खो, भन्ते, भिक्खुसङ्घो अनुप्पत्तो। अहं सङ्घस्स आरामिको केन'त्थो? किं मया करणीयं”ति? अथ खो आयस्मा अस्सगुत्तो सक्कं देवानमिन्दं एतदवोच—“अयं खो, महाराज, जम्बुदीपे सागलनगरे मिलिन्दो नाम राजा वादी दुरासदो दुप्पसहो पुथुतित्थकरानं अग्गमक्खायति। सो भिक्खुसङ्घं उपसङ्कमित्वा दिट्ठिवादेन पञ्हं पुच्छित्वा भिक्खुसङ्घं विहेठेती”ति। अथ खो सक्को देवानमिन्दो आयस्मन्तं अस्सगुत्तं एतदवोच—“अयं खो, भन्ते, मिलिन्दो राजा इतो चुतो मनुस्सेसु उप्पन्नो। एसो खो, भन्ते, केतुमतीविमाने महासेनो नाम देवपुत्तो पटिवसति। सो तेन मिलिन्देन रञ्ञा सद्धिं पटिबलो सल्लपितुं कङ्खं पटिविनोदेतुं। तं देवपुत्तं याचिस्साम मनुस्सलोकूपपत्तिया”ति।

अथ खो सक्को देवानमिन्दो भिक्खुसङ्घं पुरक्खत्वा केतुमतीविमानं पविसित्वा महासेनं देवपुत्तं आलिङ्गित्वा एतदवोच—“याचति तं, मारिस, भिक्खुसङ्घो मनुस्सलोकूपपत्तिया”ति।

“न मे, भन्ते, मनुस्सलोकेन'त्थो कम्मबहुलेन। तिब्बो मनुस्सलोको। इधेवा'हं, भन्ते, देवलोके उपरूपरूपपत्तिको हुत्वा परिनिब्बायिस्सामी'ति। दुतियम्पि, ततियम्पि खो सक्केन देवानमिन्देन याचितो महासेनो देवपुत्तो एवमाह—“न मे, भन्ते,

दूरत एवागच्छत. । दृष्ट्वा येनायुष्मानश्वगुप्तस्तेनोपसमक्रमीत् । उपसङ्क्रम्यायुष्मन्तमश्वगुप्तमभिवाद्यैकान्तमस्थात् ।

एकान्तं स्थितः खलु शक्रो देवानामिन्द्र आयुष्मन्तमश्वगुप्तमेतदवोचत्–"महान् खलु, भदन्त, भिक्षुसङ्घोऽनुप्राप्तः । अहं सङ्घस्यारामिक. केनार्थ. ? किं मया करणीय"मिति ? अथ खलु आयुष्मानश्वगुप्तः शक्रं देवानामिन्द्रमेतदवोचत्–"अयं खलु, महाराज, जम्बुद्वीपे सागलनगरे मिलिन्दो नाम राजा वादी दुरासदो दुष्प्रसह पृथुतीर्थकराणामग्र्य आख्यायते । स भिक्षुसङ्घमुपसंक्रम्य दृष्टिवादेन प्रश्नं पृष्ट्वा भिक्षुसङ्घान् विहेठयती"ति । अथ खलु शक्रो देवानामिन्द्र आयुष्मन्तमश्वगुप्तमेतदवोचत्–"अयं खलु, भदन्त, मिलिन्दो राजा इतश्च्युतो मनुष्येषूत्पन्न । एष खलु, भदन्त, केतुमतीविमाने महासेनो नाम देवपुत्र प्रतिवसति । स तेन मिलिन्देन राज्ञा सार्धं प्रतिबल संलपितुं शङ्का प्रतिविनोदयितुं । तं देवपुत्रं याचिष्यामो मनुष्यलोकोपपत्तय"इति ।

अथ खलु शक्रो देवानामिन्द्रो भिक्षुसङ्घं पुरस्कृत्य केतुमतीविमानं प्रविश्य महासेनं देवपुत्रमालिङ्ग्य एतदवोचत्–"याचति त्वा, मार्ष, भिक्षुसङ्घो मनुष्यलोकोपपत्तय"इति।

"न मे, भदन्त, मनुष्यलोकेनार्थः कर्मबहुलेन । तीव्रो मनुष्यलोक. । इहैवाहं, भदन्त, देवलोके उपर्युपर्युपपत्तिको भूत्वा परिनिर्वास्यामी"ति । द्वितीयमपि, तृतीयमपि खलु शक्रेण देवानामिन्द्रेण याचितो महासेनो देवपुत्रएवमाह–"न मे, भदन्त,

मनुस्सलोकेन'त्थो कम्मबहुलेन । तिब्बो मनुस्सलोको । इधेवा'हं, भन्ते, देवलोके उपरूपरूपपत्तिको हुत्वा परिनिब्बायिस्सामी''ति । अथ खो आयस्मा अस्सगुत्तो महासेनं देवपुत्तं एतदवोच– ''इध मयं, मारिस, सदेवकं लोकं अनुविलोकयमाना अञ्ञत्र तया मिलिन्दस्स रञ्ञो वादं भिन्दित्वा सासनं पग्गहेतुं समत्थं अञ्ञं कञ्चि न पस्साम । याचति तं, मारिस, भिक्खुसङ्घो– ''साधु, सप्पुरिस, मनुस्सलोके निब्बत्तित्वा दसबलस्स सासनं पग्गण्हाही'ति । एवं वुत्ते महासेनो देवपुत्तो–''अहं किर मिलिन्दस्स रञ्ञो वादं भिन्दित्वा बुद्धसासनं पग्गहेतुं समत्थो भविस्सामी''ति हट्ठपहट्ठो उदग्गुदग्गो हुत्वा–''साधु, भन्ते, मनुस्सलोके उप्पज्जिस्सामी''ति पटिञ्ञं अदासि ।

अथ खो ते भिक्खू देवलोके तं करणीयं तीरेत्वा देवेसु तावतिंसेसु अन्तरहिता हिमवन्ते पब्बते रक्खिततले पातुरहेसुं ।

## ६—आयस्मतो रोहणस्स दण्डकम्मं

अथ खो आयस्मा अस्सगुत्तो भिक्खुसङ्घं एतदवोच– 'अत्था'-वुसो, इमस्मिं भिक्खुसङ्घे कोचि भिक्खु सन्निपातं अनागतो''ति ? एवं वुत्ते अञ्ञतरो भिक्खु आयस्मन्तं अस्सगुत्तं एतदवोच–''अत्थि, भन्ते, आयस्मा रोहणो इतो सत्तमे दिवसे हिमवन्तं पब्बतं पविसित्वा निरोधं समापन्नो'' ।

''तस्स सन्तिके दूतं पाहेथा''ति ।

आयस्मा'पि रोहणो तं खणञ्ञेव निरोधा वुट्ठाय ''सङ्घो मं पटिमानेती''ति हिमवन्ते पब्बते अन्तरहितो रक्खिततले कोटिसतानं अरहन्तानं पुरतो पातुरहोसि । अथ खो आयस्मा अस्सगुत्तो

मनुष्यलोकेनार्थं कर्मबहुलेन । तीव्रो मनुष्यलोक । इहैवाहं, भदन्त, देवलोके उपर्युपर्युपपत्तिको भूत्वा परिनिर्वास्यामी" ति ।

अथ खलु आयुष्मानश्वगुप्तो महासेनं देवपुत्रमेतदवोचत्–"इह वयं, मार्ष, सदेवकं लोकमनुविलोकयन्तोऽन्यत्र त्वया मिलिन्दस्य राज्ञो वादं भित्त्वा शासनं प्रग्रहीतुं समर्थमन्यं कञ्चिन्न पश्यामः । याचति त्वा, मार्ष, भिक्षुसङ्घः– 'साधु, सत्पुरुष, मनुष्यलोके निर्वृत्य दशबलस्य शासनं प्रगृहाणे"ति । एवमुक्ते महासेनो देवपुत्र –"अहं किल मिलिन्दस्य राज्ञो वादं भित्त्वा बुद्धशासनं प्रग्रहीतुं समर्थो भविष्यामी"ति हृष्टप्रहृष्ट उदग्रोदग्रो भूत्वा–"साधु, भदन्त, मनुष्यलोके उत्पत्स्ये" इति प्रतिज्ञामदात् ।

अथ खलु ते भिक्षवो देवलोके तत् करणीयं तीर्त्वा देवेषु त्रायस्त्रिंशेषु अन्तर्हिता हिमवति पर्वते रक्षिततले प्रादुरभूवन् ।

## ६—आयुष्मतो रोहणस्य दण्डकर्म

अथ खलु आयुष्मानश्वगुप्तो भिक्षुसङ्घमेतदवोचत्—"अस्ति, आयुष्मन्, अस्मिन् भिक्षुसङ्घे कश्चिद् भिक्षुः सन्निपातमनागत" इति ? एवमुक्तेऽन्यतरो भिक्षुरायुष्मन्तमश्वगुप्तमेतदवोचत्–"अस्ति, भदन्त, आयुष्मान् रोहण इतः सप्तमे दिवसे हिमवन्तं पर्वतं प्रविश्य निरोधं समापन्न " ।

"तस्यान्तिके दूतं प्रहिण्व"ति ।

आयुष्मानपि रोहणस्तत्क्षणमेव निरोधादुत्थाय "सङ्घो मां प्रतिमानयती"ति हिमवति पर्वतेऽन्तर्हितो रक्षिततले कोटिशतानामर्हतां पुरतः प्रादुरभूत् । अथ खलु आयुष्मानश्वगुप्त

आयस्मन्तं रोहणं एतदवोच–"किनु खो, आवुसो रोहण, बुद्धसासने भिब्भन्ते न पस्ससि सङ्घस्स करणीयानी"ति ?

"अमनसिकारो मे, भन्ते, अहोसी"ति ।

"तेनावुसो, रोहण, दण्डकम्मं करोही"ति । "किं, भन्ते, करोमी"ति । "अत्था'वुसो रोहण, हिमवन्तपब्बतपस्से कजंगलं नाम ब्राह्मणगामो । तत्थ सोणुत्तरो नाम ब्राह्मणो पटिवसति । तस्स पुत्तो उप्पज्जिस्सति नागसेनो नाम दारको । तेन हि त्वं, आवुसो रोहण, दसमासा'धिकानि सत्तवस्सानि तं कुलं पिण्डाय पविसित्वा नागसेनं दारकं नीहरित्वा पब्बाजेहि । पब्बजिते व तस्मिं दण्डकम्मतो मुच्चिस्ससी"ति । आयस्मा'पि खो रोहणो "साधू"ति सम्पटिच्छि ।

महासेनोऽपि खो देवपुत्तो देवलोका चवित्वा सोणुत्तरब्राह्मणस्स भरियाय कुच्छिस्मिं पटिसन्धिं अग्गहेसि । सह पटिसन्धिग्गहणा तयो अच्छरिया अब्भुता धम्मा पातुरहोसुं । आवुधभण्डानि पज्जलिसु, अग्गसस्सं अभिनिप्फन्नं, महामेघो अभिप्पवस्सि । आयस्मा'पि खो रोहणो तस्स पटिसन्धिग्गहणतो पट्ठाय दसमासा'धिकानि सत्तवस्सानि तं कुलं पिण्डाय पविसन्तो एकदिवसम्पि कटच्छुमत्तं भत्तं वा उळुङ्कमत्तं यागुं वा अभिवादनं वा अञ्जलिकम्मं वा सामीचिकम्मं वा ना'लत्थ । अथ खो अक्कोसं येव परिभासं येव पटिलभति । "अनिच्छथ भन्ते"ति वचनमत्तम्पि वत्ता नाम ना'होसि । दसमासा'धिकानं पन सत्तन्नं वस्सानं अच्चयेन एकदिवसं–"अनिच्छथ भन्ते"ति वचनमत्तं अलत्थ । तं दिवसमेव ब्राह्मणो पि बहिकम्मन्ता

आयुष्मन्तं रोहणमेतदवोचत्—"किन्नु खलु, आयुष्मन् रोहण, बुद्धशासनानि भिन्दन् न पश्यसि सङ्घस्य करणीयानी"ति ?

'अमनसिकारो मम, भदन्त, अभूदि" ति ।

"तेनायुष्मन्, रोहण, दण्डकर्म्म कुर्वि"ति । "किं, भदन्त, करोमी"ति ? "अस्त्यायुष्मन् रोहण, हिमवत्पर्वतपार्श्वे कजङ्गलं नाम ब्राह्मणग्रामः । तत्र शोणोत्तरो नाम ब्राह्मण प्रतिवसति । तस्य पुत्र उत्पत्स्यते नागसेनो नाम दारकः । तेन हि त्वमायुष्मन् रोहण, दशमासाधिकानि सप्तवर्षाणि तत् कुलं पिण्डाय प्रविश्य नागसेनं दारकं नीहृत्य प्रव्राजय । प्रव्रजिते एव तस्मिन् दण्डकर्मतो मोक्ष्यसे' इति । आयुष्मानपि खलु रोहणः 'साध्वि"ति सम्प्रत्यैषीत् ।

महासेनोऽपि खलु देवपुत्रो देवलोकाच्च्युत्वा शोणोत्तरब्राह्मणस्य भार्याया कुक्षौ प्रतिसन्धिमग्रहीत् । सह प्रतिसन्धिग्रहणेन त्रय आश्चर्या अद्भुता धर्मा प्रादुरभूवन् । आयुधभाण्डानि प्राज्वालिषु, अग्रसस्यमभिनिष्पन्नं, महामेघोऽभिप्रावर्षीत् । आयुष्मानपि खलु रोहणस्तस्य प्रतिसन्धिग्रहणात प्रस्थाय दशमासाधिकानि सप्तवर्षाणि तत् कुलं पिण्डाय प्रविशन्नेकदिवसमपि कटच्छुमात्रं भक्तं वा उडुङ्कमात्रं यवागुं वाऽभिवादनं वाऽञ्जलिकर्म वा सामीचीनकर्म वा नालब्ध । अथ खलु आक्रोशमेव परिभाषामेव प्रतिलभते । "अतीत भदन्ता"इति वचनमात्रमपि वक्ता नाम नाभूत् । दशमासाधिकाना पुन सप्ताना वर्षाणामत्ययेनैकदिवसं—"अतीत भदन्ता"इति वचनमात्रमलब्ध । तं दिवसमेव ब्राह्मणोऽपि बहिःकर्मान्तात्

आगच्छन्तो पटिपथे थेरं दिस्वा—"किं, भो पब्बजित, अम्हाकं गेहं अगमित्था"ति आह।

"आम, ब्राह्मण, अगमम्हा"ति।

"अपि किञ्चि लभित्था"ति?

"आम, ब्राह्मण, लभिम्हा"ति।

सो अनत्तमनो गेहं गन्त्वा पुच्छि—"तस्स पब्बजितस्स किञ्चि अदत्था"ति?

"न किञ्चि अदम्हा"ति।

ब्राह्मणो दुतियदिवसे घरद्वारे येव निसीदि—"अज्ज पब्बजितं मुसावादेन निग्गहेस्सामी"ति। थेरो दुतियदिवसे ब्राह्मणस्स घरद्वारं सम्पत्तो। ब्राह्मणो थेरं दिस्वा'व एवमाह—"तुम्हे हियो अम्हाकं गेहे किञ्चि अलभित्वा'व 'लभिम्हा'ति अवोचुत्थ। वट्टति नु खो तुम्हाकं मुसावादो"ति? थेरो आह—"मयं, ब्राह्मण, तुम्हाकं गेहे पविसन्ता दसमासा'धिकानि सत्तवस्सानि 'अनिच्छथा'ति वचनमत्तम्पि अलभित्वा हिय्यो 'अनिच्छथा'ति वचनमत्तं लभिम्हा। अथे'तं वाचापटिसन्थारं उपादाय एवमवोचुम्हा"ति। ब्राह्मणो चिन्तेसि—"इमे वाचापटिसन्थारमत्तं पि लभित्वा जनमज्झे 'लभिम्हा'ति पसंसन्ति। अञ्ञं किञ्चि खादनीयं वा भोजनीयं वा लभित्वा कस्मा नप्पसंसन्ती"ति! पसीदित्वा अत्तनो अत्थाय पटियादितभत्ततो कटच्छुभिक्खं तदूपियं च ब्यञ्जनं दापेत्वा—"इमं भिक्खं सब्बकालं तुम्हे लभिस्सथा"ति आह। सो पुन दिवसतो पभुति उपसङ्कमन्तस्स थेरस्स उपसमं दिस्वा भिय्योसो मत्ताय पसीदित्वा थेरं निच्चकालं अत्तनो घरे भत्तविस्सग्गकरणत्थाय याचि। थेरो

आगच्छन् प्रतिपथे स्थविरं दृष्ट्वा—"किं, भो प्रव्रजित, अस्माकं गेहमगमते"त्याह ।

"आम् ब्राह्मण, अगमामे"ति ।

"अपि किञ्चिदलभध्वमि"ति ?

"आम, ब्राह्मण, अलप्समही"ति ।

सोऽनात्तमना गेहं गत्वाऽप्राक्षीत्—"तस्मै प्रव्रजिताय किञ्चिददाते"ति ?

"न किञ्चिददामे"ति ।

ब्राह्मणो द्वितीयदिवसे गृहद्वार एव न्यषदत्—"अद्य प्रव्रजितं मृषावादेन निग्रहीष्यामी"ति । स्थविरो द्वितीयदिवसे ब्राह्मणस्य गृहद्वारे सम्प्राप्तः । ब्राह्मण स्थविरं दृष्ट्वैव एवमाह—"यूयं ह्योऽस्माकं गेहे किञ्चिदलब्ध्वैव 'अलप्समही'ति अवोचत । वर्तते नु खलु युष्माकं मृषावाद"इति ? स्थविर आह—"वयं, ब्राह्मण, युष्माकं गेहे प्रविशन्तो दशमासाधिकानि सप्तवर्षाणि 'अतीत' इति वचनमात्रमप्यलब्ध्वा ह्यः 'अतीते'ति वचनमात्रमलप्स्महि । अथैनं वाचाप्रतिसंस्तारमुपादायैवमवोचामे"ति । ब्राह्मणोऽचिचिन्तत्—इमे वाचा प्रतिसंस्तारमात्रमपि लब्ध्वा जनमध्ये 'अलप्समही' प्रशंसन्ति । अन्यत् किञ्चित् खादनीयं भोजनीयं वा लब्ध्वा कस्मान्न प्रशंसन्ती"ति । प्रसद्यात्मनोऽर्थाय प्रतिपादितभक्ततः कटच्छुभिक्षा तदुपरि च व्यञ्जनं दापयित्वा—"इमां भिक्षा सर्वकालं यूयं लप्स्यध्व"इत्याह । स पुनर्दिवसतः प्रभृति उपसङ्क्रमतः स्थविरस्योपशमं दृष्ट्वा भूयस्या मात्रया प्रसद्य स्थविरं नित्यकालमात्मनो गृहे भक्तविसर्गकरणार्थायायाचिष्ट । स्थविर-

तुण्हीभावेन अधिवासेत्वा दिवसे दिवसे भत्तकिच्चं कत्वा गच्छन्तो थोकं थोकं बुद्धवचनं कथेत्वा गच्छति ।

## ७—नागसेनस्स दहरकालो

सा'पि खो ब्राह्मणी दसमास'च्चयेन पुत्तं विजायि । 'नागसेनो'ति'स्स नाममकंसु । सो अनुक्कमेन वड्ढन्तो सत्तवस्सिको जातो । अथ खो नागसेनस्स दारकस्स पिता नागसेनं दारकं एतदवोच—"इमस्मि खो, तात नागसेन, ब्राह्मणकुले सिक्खानि सिक्खेय्यासी"ति ।

"कतमानि, तात, इमस्मि ब्राह्मणकुले सिक्खानि नामा"ति ?

"तयो खो, तात नागसेन, वेदा सिक्खानि नाम, अवसेसानि सिप्पानि सिप्पं नामा"ति ।

"तेन हि, तात, सिक्खिस्सामी"ति ।

अथ खो सोणुत्तरो ब्राह्मणो आचरियब्राह्मणस्स आचरियभागं सहस्सं दत्वा अन्तो पासादे एकस्मिं गब्भे एकतो मञ्चकं पञ्ञपेत्वा आचरियब्राह्मणं एतदवोच—"सज्झापेहि खो त्वं, ब्राह्मण, इमं दारकं मन्तानी"ति ।

"तेन हि, तात दारक, उग्गण्हाहि मन्तानी"ति आचरियब्राह्मणो सज्झायति । नागसेनस्स दारकस्स एकेनेव उद्देसेन तयो वेदा हदयङ्गता वाचुग्गता सूपधारिता सुववत्थापिता सुमनसिकता अहेसुं । सकिमेव चक्खुं उदपादि तीसु वेदेसु सनिघण्टुकेटुभेसु साक्खरप्पभेदेसु इतिहासपञ्चमेसु पदको वेय्याकरणो लोकायतमहापुरिसलक्खणेसु अनवयो अहोसि ।

अथ खो नागसेनो दारको पितरं एतदवोच—"अत्थि

स्तूष्णीम्भावेनाधिवास्य दिवसे दिवसे भक्तकृत्यं कृत्वा गच्छन् स्तोकं स्तोकं बुद्धवचनं कथयित्वा गच्छति ।

## ७—नागसेनस्य दारककालः

साऽपि खलु ब्राह्मणी दशमासात्ययेन पुत्रं व्यजीजनत् । 'नागसेन' इत्यस्य नामाकार्षुः । सोऽनुक्रमेण वर्धमानः सप्तवार्षिको जातः । अथ खलु नागसेनस्य दारकस्य पिता नागसेनं दारकमेतदवोचत्—"अस्मिन् खलु, तात नागसेन, ब्राह्मणकुले शैक्ष्याणि शिक्षेथा" इति ।

"कतमानि, तात, अस्मिन् ब्राह्मणकुले शैक्ष्याणि नामे"ति ?

"त्रय खलु, तात नागसेन, वेदा शैक्ष्याणि नाम, अवशेषाणि शिल्पानि शिल्पं नामे"ति ।

"तेन हि, तात, शिक्षिष्य" इति ।

अथ खलु शोणोत्तरो ब्राह्मण आचार्यब्राह्मणायाचार्यभागं सहस्रं दत्वाऽन्त प्रासादे एकस्मिन् गर्भे एकतो मञ्चकं प्रज्ञाप्याचार्यब्राह्मणमेतदवोचत्—"स्वध्यापय खलु त्वं, ब्राह्मण, इमं दारकं मन्त्रानि" ति ।

"तेन हि, तात दारक, उद्गृहाण मन्त्रानि" ति आचार्यब्राह्मण स्वध्यापयति । नागसेनस्य दारकस्यैकेनैवोद्देशेन त्रयो वेदा हृदयङ्गता वाचोद्गता सूपधारिता सुव्यवस्थापिता सुमनसिकृता अभूवन् । सकृदेव चक्षुरुदपादि त्रिषु वेदेषु सनिघण्टुकेटुभेषु ( ? ) साक्षरप्रभेदेषु इतिहासपञ्चमेषु पदको वैयाकरणो लोकायतमहापुरुषलक्षणेष्वनवयोऽ-( अभिज्ञोऽ-) भूत् ।

अथ खलु नागसेनो दारकः पितरमेतदवोचत्—"सन्ति

नु खो, तात, इमस्मि ब्राह्मणकुले इतो उत्तरिम्पि सिक्खितब्बानि, उदाहु एत्तकानेवा"ति ?

"नत्थि तात नागसेन, इमस्मि ब्राह्मणकुले इतो उत्तरिं सिक्खितब्बानि । एत्तकानेव सिक्खितब्बानी"ति ।

अथ खो नागसेनो दारको आचरियस्स अनुयोगं दत्वा पासादा ओरुय्ह पुब्बवासनाचोदितहदयो रहोगतो पटिसल्लीनो अत्तनो सिप्पस्स आदिमज्झपरियोसानं ओलोकेन्तो आदिम्हि वा मज्झे वा परियोसाने वा अप्पमत्तकम्पि सारं अदिस्वा– 'तुच्छा वत, भो इमे वेदा, पलापा वत, भो इमे वेदा असारा निस्सारा'ति विप्पटिसारी अनत्तमनो अहोसि ।

तेन खो पन समयेन आयस्मा रोहणो वत्तनिये सेनासने निसिन्नो नागसेनस्स दारकस्स चेतसा चेतोपरिवितक्कमञ्ञाय निवासेत्वा पत्तचीवरमादाय वत्तनिये सेनासने अन्तरहितो कजङ्गलब्राह्मणगामस्स पुरतो पातुरहोसि ।

## ८—आयस्मता रोहणेन नागसेनस्स समागमो

अद्दसा खो नागसेनो दारको अत्तनो द्वारकोट्ठके ठितो आयस्मन्तं रोहणं दूरतो' व आगच्छन्तं, दिस्वान अत्तमनो उदग्गो पमुदितो पीतिसोमनस्सजातो–"अप्पेव नामा'यं पब्बजितो किञ्चि सारं जानेय्या"ति येना'यस्मा रोहणो तेनुपसङ्कमि । उपसङ्कमित्वा आयस्मन्तं रोहणं एतदवोच–"को नु खो त्वं, मारिस, एदिसो भण्डु कासाववसनो"ति ?

"पब्बजितो नामा'हं दारका"ति ।

"केन हि त्वं, मारिस, पब्बजितो नामासि" ?

नु खलु, तात, अस्मिन् ब्राह्मणकुले इत उत्तरमपि शिक्षितव्यानि, उताहो एतावन्त्येवे" ति ?

"न सन्ति, तात नागसेन, अस्मिन् ब्राह्मणकुले इत उत्तरं शिक्षितव्यानि । एतावन्त्येव शिक्षितव्यानी"ति ।

'अथ खलु नागसेनो दारक आचार्यस्यानुयोगं दत्वा प्रासादादवरुह्य पूर्ववासनाचोदितहृदयो रहोगत प्रतिसंलीन आत्मन. शिल्पस्यादिमध्यपर्यवसानमवलोकयन्नादौ वा मध्ये वा पर्यवसाने वाऽल्पमात्रकमपि सारमदृष्ट्वा—"तुच्छा बत भो, इमे वेदा, प्रलापा बत, भो, इमे वेदा, असारा निस्सारा' इति विप्रतिसारी अनात्तमना अभूत् ।

तेन खलु पुन समयेनायुष्मान् रोहणो वर्त्तनीये शयनासने निषण्णो नागसेनस्य दारकस्य चेतसा चेत परिवितर्कमाज्ञाय निवास्य पात्रचीवरमादाय वर्त्तनीये शयनासनेऽन्तर्हित कजङ्गलब्राह्मणग्रामस्य पुरत प्रादुरभूत् ।

### ८—आयुष्मता रोहणेन नागसेनस्य समागमः

अदर्शत् खलु नागसेनो दारक आत्मनो द्वारकोष्ठके स्थित आयुष्मन्तं रोहणं दूरत एवागच्छन्तम्, दृष्ट्वाऽऽत्तमना उदग्र प्रमुदित प्रीतिसौमनस्यजात "अप्येव नामायं प्रव्रजितः कश्चित् सारं जानीयादि"ति येनायुष्मान् रोहणस्तेनोपसमक्रमीत् । उपसङ्क्रम्यायुष्मन्तं रोहणमेतदवोचत्—'को नु खलु त्वं, मार्ष, ईदृश भण्डु काषायवसन"इति ?

"प्रव्रजितो नामाहं, दारके"ति ।

"केन त्वं, मार्ष, प्रव्रजितो नामा"सि ?

"पापकानं मलानं पब्बाजेतुं पब्बजितो । तस्मा'हं, दारक, पब्बजितो नामा"ति ।

"किङ्कारणा, मारिस, ते केसा न यथा अञ्ञेसं"ति ?

"सोळसि'मे, दारक, पलिबोधे दिस्वा केसमस्सुं ओहारेत्वा पब्बजितो । कतमे सोळस ? अलङ्कारपलिबोधो, मण्डनपलिबोधो, तेलमक्खनपलिबोधो, धोवनपलिबोधो, मालापलिबोधो, गन्धपलिबोधो, वासनपलिबोधो, हरीटकपलिबोधो, आमलकपलिबोधो, रङ्गपलिबोधो, बन्धनपलिबोधो, कोच्छपलिबोधो, कप्पकपलिबोधो, विजटनपलिबोधो, ऊकापलिबोधो, केसेसु विलूनेसु सोचन्ति किलिमन्ति परिदेवन्ति उरत्ताळि कन्दन्ति, सम्मोहं आपज्जन्ति । इमेसु खो, दारक, सोळसपलिबोधेसु पलिगुण्ठिता मनुस्सा सब्बानि अतिसुखुमानि सिप्पानि नासेन्ती"ति ।

"किङ्कारणा, मारिस, वत्थानि पि ते न यथा अञ्ञेसं"ति ?

"कामनिस्सितानि खो, दारक, वत्थानि कमनीयानि गिहिब्यञ्जनानि । यानि कानिचि खो भयानि वत्थतो उप्पज्जन्ति, तानि कासाववसनस्स न होन्ति । तस्मा वत्थानिपि मे न यथा अञ्ञेसं"ति ।

"जानासि खो त्वं, मारिस, सिप्पानि नामा"ति ? "आम, दारक, जानाम'हं सिप्पानि । यं लोके उत्तमं मन्तं तं पि जानामी"ति ।

"मय्हं पि तं, मारिस, दातुं सक्का"ति ?

"आम, दारक, सक्का"ति ।

"तेन हि मे देही"ति ।

"अकालो खो, दारक । अन्तरघरं पिण्डाय पविट्ठ'म्हा"ति ।

"पापकानि मलानि प्रव्राजयितुं प्रव्रजित । तस्मादहं, दारक, प्रव्रजितो नामे"ति ।

"किं कारणं, मार्ष, ते केशा न यथाऽन्येषामि"ति ?

"षोडशेमान्, दारक, परिबाधान् दृष्ट्वा केशश्मश्रुणी अवहार्य प्रव्राजितः । कतमे षोडश ? अलङ्कारपरिबाधः, मण्डनपरिबाधः, तैलम्रक्षणपरिबाधः, धावनपरिबाधः, मालापरिबाधः, गन्धपरिबाधः, वासनपरिबाधः, हरीतकपरिबाधः, आमलकपरिबाधः, रङ्गपरिबाधः, बन्धनपरिबाधः, कोच्छपरिबाधः, कल्पकपरिबाधः, विजटनपरिबाधः, यूकपरिबाधः, केशेषु विलूनेषु शोचन्ति क्लिश्यन्ति परिदेवन्ति, उरस्ताडं क्रन्दन्ति, सम्मोहमापद्यन्ते । एषु खलु षोडशपरिबाधेषु परिगुण्ठिता मनुष्या सर्वाण्यतिसूक्ष्माणि शिल्पानि नाशयन्ती"ति ।

"किङ्कारणं, मार्ष, वस्त्राण्यपि ते न यथाऽन्येषामि"ति ?

कामनिश्रितानि खलु, दारक, वस्त्राणि कमनीयानि गृहिव्यञ्जनानि । यानि कानिचित् खलु भयानि वस्त्रत उत्पद्यन्ते तानि काषायवसनस्य न भवन्ति । तस्माद् वस्त्राण्यपि मम न यथाऽन्येषामि"ति ।

"जानासि खलु त्वं, मार्ष, शिल्पानि नामे"ति ? "आम, दारक, जानाम्यहं शिल्पानि । यो लोके उत्तमो मन्त्रस्तमपि जानामी"ति ।

"मह्यमपि तन्मार्ष, दातुं शक्त"इति ?

"आम्, दारक, शक्त"इति ।

"तेन हि मे देही"ति ।

"अकालः खलु, दारक । अन्तर्गृहं पिण्डाय प्रविक्षामे"ति ।

अथ खो नागसेनो दारको आयस्मतो रोहणस्स हत्थतो पत्तं गहेत्वा घरं पवेसेत्वा पणीतेन खादनीयेन भोजनीयेन सहत्था सन्तप्पेत्वा सम्पवारेत्वा आयस्मन्तं रोहणं भुत्ताविं ओनीतपत्तपाणिं एतदवोच—"देहि मे दानि, मारिस, मन्तं"ति ।

"यदा खो त्वं, दारक, निप्पलिबोधो हुत्वा मातापितरो अनुजानापेत्वा मया गहितं पब्बजितवेसं गण्हिस्ससि तदा दस्सामी"ति आह ।

## ६—नागसेनस्स पब्बज्जा

अथ खो नागसेनो दारको मातापितरो उपसङ्कमित्वा आह—"अम्म, तात, अयं पब्बजितो 'य लोके उत्तमं मन्तं तं जानामी' ति वदति । न च अत्तनो सन्तिके अपब्बजितस्स देति । अहमेतस्स सन्तिके पब्बजित्वा तं मन्तं उग्गण्हिस्सामी"ति । अथ'स्स मातापितरो—"पब्बजित्वा'पि नो पुत्तो मन्तं गण्हतु । गहेत्वा पुन आगच्छिस्सती"ति मञ्ञमाना "गण्ह पुत्ता"ति अनुजानिंसु । अथ खो आयस्मा रोहणो नागसेनं दारकं आदाय येन वत्तनियं सेनासनं येन विजम्भवत्थु तेनुपसङ्कमि । उपसङ्कमित्वा विजम्भवत्थुस्मिं सेनासने एकरत्तं वसित्वा येन रक्खिततलं तेनुपसङ्कमि । उपसङ्कमित्वा कोटिसतानं अरहन्तानं मज्झे नागसेनं दारकं पब्बाजेसि ।

पब्बजितो च पना'यस्मा नागसेनो आयस्मन्तं रोहणं एतदवोच—"गहितो मे, भन्ते, तव वेसो । देथ मे दानि मन्तं"ति । अथ खो आयस्मा रोहणो "किम्हि नु खो'हं नागसेनं विनेय्यं पठमं विनये वा सुत्तन्ते वा अभिधम्मे वा"ति चिन्तेत्वा "पण्डितो खो अयं नागसेनो, सक्कोति सुखेनेव अभिधम्मं परियापुणितुं"ति पठमं अभिधम्मे विनेसि । आयस्मा च नागसेनो—"कुसला धम्मा,

अथ खलु नागसेनो दारक आयुष्मतो रोहणस्य हस्तात् पात्रं गृहीत्वा गृहं प्रवेश्य प्रणीतेन खादनीयेन भोजनीयेन स्वहस्तात् सन्तर्प्य सम्प्रवार्यायुष्मन्तं रोहणं भुक्तवन्तमवनीतपात्रपाणिमेतदवोचत्—"देहि मे इदानी, मार्ष, मन्त्रमि"ति ।

"यदा खलु त्वं, दारक, निष्परिबाधो भूत्वा मातापितरावनुज्ञाप्य मया गृहीतं प्रव्रजितवेषं ग्रहीष्यसि तदा दास्यामी"त्याह ।

## ९—नागसेनस्य प्रव्रज्या

अथ खलु नागसेनो दारको मातापितरावुपसङ्क्रम्याह—"अम्म, तात, अयं प्रव्रजितो 'यो लोके उत्तमो मन्त्रस्तं जानामी' ति वदति । न चात्मनोऽन्तिकेऽप्रव्रजिताय ददाति । अहमेतस्यान्तिके प्रव्रज्य तं मन्त्रमुदग्रहीष्यामी"ति । अथास्य मातापितरौ—"प्रव्रज्यापि न पुत्रो मन्त्रं गृह्णातु । गृहीत्वा पुनरागमिष्यती"ति मन्यमानौ "गृहाण पुत्रे"त्यन्वज्ञासिष्टाम् । अथ खलु आयुष्मान् रोहणो नागसेनं दारकमादाय येन वर्तनीयं शयनासनं येन विजम्भवस्तु तेनोपसमक्रमीत् । उपसङ्क्रम्य विजम्भवस्तुनि शयनासने एकरात्रमुषित्वा येन रक्षिततलं तेनोपसमक्रमीत् । उपसङ्क्रम्य कोटिशतानामर्हता मध्ये नागसेनं दारकं प्राव्राजत् ।

प्रव्रजितश्च पुनरायुष्मान् नागसेन आयुष्मन्तं रोहणमेतदवोचत्—"गृहीतो मया, भदन्त, तव वेष । देहि मे इदानी मन्त्रमि"ति । अथ खलु आयुष्मान् रोहणः "कस्मिन्नु खलु अहं नागसेनं विनयेयं प्रथमं विनये वा सूत्रान्ते वाऽभिधर्मे वे"ति चिन्तयित्वा "पण्डित खलु अयं नागसेनः, शक्नोति सुखेनैवाभिधर्मं पर्याप्तुमि"ति प्रथममभिधर्मे व्यनैषीत् । आयुष्मांश्च नागसेन —"कुशला धर्मा,

अकुसला धम्मा, अब्याकता धम्मा''ति तिकदुकपटिमण्डितं धम्मसङ्गणिपकरणं, खंधविभङ्गादिअट्ठारसविभङ्गपटिमण्डितं विभङ्गप्पकरणं, 'सङ्गहो असङ्गहो'तिआदिना चुद्दसविधेन विभत्तं धातुकथापकरणं, खन्धपञ्ञत्तिआयतनपञ्ञत्ती'तिआदिना छब्बिधेन विभत्तं पुग्गलपञ्ञत्तिप्पकरणं, सकवादे पञ्चसुत्तसतानि परवादे पञ्चसुत्तसतानी'ति सुत्तसहस्सं समोधानेत्वा विभत्तं कथावत्थुप्पकरणं, मूलयमकं खन्धयमकं'तिआदिना दसविधेन विभत्तं यमकप्पकरणं, हेतुपच्चयो आरम्मणपच्चयो'ति आदिना चतुवीसतिविधेन विभत्तं पट्ठानप्पकरणं'ति सब्बं तं अभिधम्मपिटकं एकेनेव सज्झायेन पगुणं कत्वा ''तिट्ठथ, भन्ते न पुन ओसारेथ, एत्तकेनेवा'हं सज्झायिस्सामी''ति आह।

अथ खो आयस्मा नागसेनो येन कोटिसता अरहन्तो तेनुपसङ्कमि। उपसङ्कमित्वा कोटिसते अरहन्ते एतदवोच—''अहं खो, भन्ते, कुसला धम्मा, अकुसला धम्मा, अब्याकता धम्मा'ति इमेसु तीसु पदेसु पक्खिपित्वा सब्बं तं अभिधम्मपिटकं वित्थारेन ओसारेस्सामी''ति।

''साधु, नागसेन, ओसारेही''ति।

अथ खो आयस्मा नागसेनो सत्तमासानि सत्तप्पकरणानि वित्थारेन ओसारेसि। पथवी उन्नदि। देवता साधुकारमदंसु। ब्रह्मानो अप्फोटेसु। दिब्बानि चन्दनचुण्णानि दिब्बानि च मन्दारवपुप्फानि अभिप्पवस्सिसु।

## १०—आयस्मतो नागसेनस्स दण्डकम्मं

अथ खो कोटिसता अरहन्तो आयस्मन्तं नागसेनं परिपुण्णवीसतिवस्सं रक्खिततले उपसम्पादेसुं। उपसम्पन्नो च पना-

कुशला धर्माः, अव्याकृता धर्मा''इति त्रिकद्विकप्रतिमण्डितं धर्मसङ्गणीप्रकरणं, स्कन्धविभङ्गादिअष्टादशविभङ्गप्रतिमण्डितं विभङ्गप्रकरणं, संग्रहोऽसंग्रह इत्यादिना चतुर्दशविधेन विभक्तं धातुकथाप्रकरणं, स्कन्धप्रज्ञप्त्यायतनप्रज्ञप्तीत्यादिना षड्विधेन विभक्तं पुद्गलप्रज्ञप्तिप्रकरणं, स्वकवादे पञ्चसूत्रशतानि परवादे पञ्चसूत्रशतानी'ति सूत्रसहस्रं समवधाय विभक्तं कथावस्तुप्रकरणं, मूलयमकं स्कन्धयमकमित्यादिना दशविधेन विभक्तं यमकप्रकरणं, हेतुप्रत्यय आरम्मणप्रत्यय इत्यादिना चतुर्विंशतिविधेन विभक्तं प्रस्थानप्रकरणमिति सर्वं तदभिधर्मपिटकमेकेनैव स्वाध्यायेन प्रगुणं कृत्वा''तिष्ठत, भदन्ता, न पुनरवसारयत, एतावदेवाहं स्वध्येष्य''इत्याह ।

अथ खलु आयुष्मान् नागसेनो येन कोटिशता अर्हन्तस्तेनोपसमक्रमीत् । उपसङ्क्रम्य कोटिशतानर्हत एतदवोचत्––''अहं खलु, भदन्ता, कुशला धर्माः, अकुशला धर्माः, अव्याकृता धर्मा इत्येषु त्रिषु पदेषु प्रक्षिप्य सर्वं तदभिधर्मपिटकं विस्तारेणावसारयिष्यामो''ति ।

''साधु, नागसेन, अवसारये''ति ।

अथ खलु आयुष्मान् नागसेनः सप्तमासानि सप्तप्रकरणानि विस्तारेणावासीसरत् । पृथिवी उदनंसीत् । देवाः साधुकारमदुः । ब्रह्माणोऽस्फोटिषत । दिव्यानि चन्दनचूर्णानि दिव्यानि च मन्दारपुष्पाण्यभिप्रावर्षिषुः ।

### १०—आयुष्मतो नागसेनस्य दण्डकर्म

अथ खलु कोटिशता अर्हन्त आयुष्मन्तं नागसेनं परिपूर्णविंशतिवर्षं रक्षिततले उपसमपीपदन् । उपसम्पन्नश्च पुन-

यस्मा नागसेनो तस्सा रत्तिया अच्चयेन पुब्बण्हसमयं निवासेत्वा पत्तचीवरमादाय उपज्झायेन सद्धिं गामं पिण्डाय पविसन्तो एवरूपं परिवितक्कं उप्पादेसि—''तुच्छो वत मे उपज्झायो, बालो वत मे उपज्झायो। ठपेत्वा अवसेसं बुद्धवचनं पठमं मं अभिधम्मे विनेसी''ति । अथ खो आयस्मा रोहणो आयस्मतो नागसेनस्स चेतसा चेतोपरिवितक्कमञ्ञाय आयस्मन्तं नागसेनं एतदवोच—''अननुच्छविकं खो, नागसेन, परिवितक्कं वितक्केसि । न खो पने'तं, नागसेन, तवानुच्छविकं''ति । अथ खो आयस्मतो नागसेनस्य एतदहोसि—''अच्छरियं वत भो, अब्भुतं वत भो ! यत्र हि नाम मे उपज्झायो चेतसा चेतोपरिवितक्कं जानिस्सति ! पण्डितो बत मे उपज्झायो । यन्नूना'हं उपज्झायं खमापेय्यं'' ति । अथ खो आयस्मा नागसेनो आयस्मन्तं रोहणं एतदवोच—''खमथ मे, भन्ते । न पुन एवरूपं वितक्केस्सामी'' ति । अथ खो आयस्मा रोहणो आयस्मन्तं नागसेनं एतदवोच—''न खो त्या' हं, नागसेन, एत्तावता खमामि । अत्थि खो, नागसेन, सागलं नाम नगरं । तत्थ मिलिन्दो नाम राजा रज्जं कारेति । सो दिट्ठिवादेन पञ्हं पुच्छित्वा भिक्खुसङ्घं विहेठेति । सचे त्वं तत्थ गन्त्वा तं राजानं दमेत्वा बुद्धसासने पसादेस्ससि, एवा'हं तं खमिस्सामी'' ति ।

''तिट्ठतु, भन्ते, एको मिलिन्दो राजा । सचे, भन्ते, सकलजम्बुदीपे सब्बे राजानो आगन्त्वा मं पञ्हं पुच्छेय्युं सब्बं तं विसज्जेत्वा सम्पदालेस्सामी''ति । ''खमथ मे, भन्ते'' ति वत्वा ''न खमामी'' ति वुत्ते ''तेन हि, भन्ते, इम तेमासं कस्स सन्तिके वसिस्सामी'' ति आह ।

''अयं खो, नागसेन, आयस्मा अस्सगुत्तो वत्तनिये सेनासने विह-

रायुष्मान्नागसेनस्तस्या रात्र्या अत्ययेन पूर्वासमयं निवास्य पात्र-चीवरमादायोपाध्यायेन सार्धं ग्रामं पिण्डाय प्रविशन्नेवंरूपं परि-वितर्कमुदपीपदत्–"तुच्छो बत मे उपाध्यायः, बालो बत मे उपाध्यायः। स्थापयित्वाऽवशेषं बुद्धवचनं प्रथमं मामभिधर्मे व्यनैषीदि"ति। अथ खलु आयुष्मान् रोहण आयुष्मतो नागसेनस्य चेतसा चेतःपरिवितर्क-माज्ञायायुष्मन्तं नागसेनमेतदवोचत्–"अनानुश्रविकं खलु, नागसेन, परिवितर्कं वितर्कयसि। न खलु पुनरेतन्नागसेन, तवानुश्रविकमि" ति। अथ खलु आयुष्मतो नागसेनस्यैतदभूत्–"आश्चर्यं बत, भोः, अद्भुतं बत भोः! यत्र हि नाम मे उपाध्यायश्चेतसा चेतःपरिवितर्कं ज्ञास्यति! पण्डितो बत मे उपाध्यायः। यन्नूनमहमुपाध्यायं क्षमापयेयमि"ति। अथ खलु आयुष्मान्नागसेन आयुष्मन्तं रोहण-मेतदवोचत्–"क्षमध्वं, मे, भन्दताः। न पुनरेवंरूपं वितर्कयिष्यामी" ति। अथ खल्वायुष्मान् रोहण आयुष्मन्तं नागसेनमेतदवोचत्–"न खलु तवाहं, नागसेन, एतावता क्षमे। अस्ति खलु, नागसेन, सागलं नाम नगरम्। तत्र मिलिन्दो नाम राजा राज्यं कारयति। स दृष्टिवादेन प्रश्नं पृष्ट्वा भिक्षुसङ्घं विहेठयति। चेत् त्वं तत्र गत्वा तं राजानं दमयित्वा बुद्धशासने प्रसादयिष्यसि, एवमहं त्वां क्षमिष्य" इति।

तिष्ठतु, भदन्त, एको मिलिन्दो राजा। चेद्, भदन्त, सकल-जम्बुद्वीपे सर्वे राजान आगत्य मां प्रश्नं पृच्छेयुः सर्वं तं विसर्ज्य सम्पदालयिष्यामी"ति। "क्षमध्वं मे, भदन्ता!" इत्युक्त्वा "न क्षमे" इत्युक्ते, "तेन हि, भदन्त, इदं त्रैमासं कस्यान्तिके वत्स्यामी"त्याह।

"अयं खलु, नागसेन, आयुष्मानश्वगुप्तो वर्तनीये शयनासने विह-

रति । गच्छ त्वं, नागसेन, येना'यस्मा अस्सगुत्तो तेनुपसङ्कम । उपसङ्कमित्वा मम वचनेन आयस्मतो अस्सगुत्तस्स पादे सिरसा वन्द । एवञ्च नं वदेहि–'उपज्झायो मे, भन्ते, तुम्हाकं पादे सिरसा वन्दति, अप्पा'बाधं अप्पा'तङ्कं लहुट्ठानं बलं फासुविहारं पुच्छति । उपज्झायो मे, भन्ते, इमं तेमासं तुम्हाकं सन्तिके वसितुं मं पहिणी'ति । 'कोनामो ते उपज्झायो'ति च वुत्ते 'रोहिणत्थेरो नाम भन्ते'ति वदेय्यासि । 'अहं को नामो'ति वुत्ते एवं वदेय्यासि– 'मम उपज्झायो, भन्ते, तुम्हाकं नामं जानाती' ति ।

"एवं, भन्ते'ति खो आयस्मा नागसेनो आयस्मन्तं रोहणं अभिवादेत्वा पदक्खिणं कत्वा पत्तचीवरमादाय अनुपुब्बेन चारिकं चरमानो येन वत्तनियं सेनासनं येना'यस्मा अस्सगुत्तो तेनुपसङ्कमि । उपसङ्कमित्वा आयस्मन्तं अस्सगुत्तं अभिवादेत्वा एकमन्तं अट्ठासि । एकमन्तं ठितो खो आयस्मा नागसेनो आयस्मन्तं अस्सगुत्तं एतदवोच– "उपज्झायो मे, भन्ते, तुम्हाकं पादे सिरसा वन्दति, एवञ्च वदति–अप्पा'बाधं अप्पा'तङ्कं लहुट्ठानं बलं फासुविहारं पुच्छति । उपज्झायो मे, भन्ते, इमं तेमासं तुम्हाकं सन्तिके वसितुं मं पहिणी" ति । अथ खो आयस्मा अस्सगुत्तो आयस्मन्तं नागसेनं एतदवोच– "त्वं किन्नामोसी" ति ?

"अहं, भन्ते, नागसेनो नामा"ति ।

"कोनामो ते उपज्झायो"ति ?

"उपज्झायो मे, भन्ते, रोहणो नामा"ति ।

"अहं कोनामो"ति ?

"उपज्झायो मे, भन्ते, तुम्हाकं नामं जानाती"ति ।

"साधु, नागसेन, पत्तचीवरं पटिसामेहि"ति ।

रति। गच्छ त्वं, नागसेन, येनायुष्मानश्वगुप्तस्तेनोपसङ्क्राम। उपसङ्क्रम्य मम वचनेनायुष्मतोऽश्वगुप्तस्य पादौ शिरसा वन्दस्व। एवञ्च तं वद–'उपाध्यायो मे, भदन्त, युष्माकं पादौ शिरसा वन्दते, अल्पाबाधमल्पातङ्कं लघुस्थानं बलं फासुविहारं पृच्छति। उपाध्यायो मे, भदन्त, इदं त्रैमासं युष्माकमन्तिके उषितुं मां प्राहैषीदि'ति। 'को नाम ते उपाध्याय'इति चोक्ते 'रोहणस्थविरो नाम भदन्ते'ति वदेः। 'अहं को नामे'त्युक्ते एवं वदेः– 'मम उपाध्यायो, भदन्त, युष्माकं नाम जानाती'ति।

'एवं, भदन्ते'ति खलु आयुष्मान् नागसेन आयुष्मन्तं रोहणमभिवाद्य प्रदक्षिणां कृत्वा पात्रचीवरमादायानुपूर्व्येण चारिकां चरन् येन वर्त्तनीयं शयनासनं येनायुष्मानश्वगुप्तस्तेनोपसमक्रमीत्। उपसंक्रम्य आयुष्मन्तमश्वगुप्तमभिवाद्य एकान्तमस्थात्। एकान्तं स्थितः खल्वायुष्मान्नागसेन आयुष्मन्तमश्वगुप्तमेनदवोचत्– "उपाध्यायो मे, भदन्त, युष्माकं पादौ शिरसा वन्दते, एवञ्च वदति–अल्पाबाधमल्पातङ्कं लघुस्थानं बलं फासुविहारं पृच्छति। उपाध्यायो, मे, भदन्त, इदं त्रैमासं युष्माकमन्तिके उषितुं मा प्राहैषीदि" ति। अथ खलु आयुष्मानश्वगुप्त आयुष्मन्तं नागसेनमेनदवोचत्– "त्वं किंनामाऽसी"ति ?

"अहं, भदन्त, नागसेनो नामे"ति।

"को नाम ते उपाध्याय" इति ?"

"उपाध्यायो मे भदन्त, रोहणो नामे"ति।

"अहं को नामे"ति ?

"उपाध्यायो मे, भदन्त, युष्माकं नाम जानाती"ति।

"साधु, नागसेन, पात्रचीवरं प्रतिशामये"ति।

"साधु, भन्ते" ति पत्तचीवरं पटिसामेत्वा पुनदिवसे परिवेणं सम्मज्जित्वा मुखोदकं दन्तपोणं उपट्ठपेसि। थेरो सम्मज्जितट्ठानं पटिसम्मज्जि। तं उदकं छड्डेत्वा अञ्ञं उदकं आहरि। तञ्च दन्तकट्ठं अपनेत्वा अञ्ञं दन्तकट्ठं गण्हि। न आलापसल्लापं अकासि। एवं सत्त दिवसानि कत्वा सत्तमे दिवसे पुन पुच्छित्वा पुन तेन तथेव वुत्ते वस्सा'वासं अनुजानि।

## ११—आयस्मतो नागसेनस्स धम्मदेसना

तेन खो पन समयेन एका महाउपासिका आयस्मन्तं अस्सगुत्तं तिसमत्तानि वस्सानि उपट्ठासि। अथ खो सा महाउपासिका तेमास'च्चयेन येना'यस्मा अस्सगुत्तो तेनुपसङ्कमि। उपसङ्कमित्वा आयस्मन्तं अस्सगुत्तं एतदवोच—"अत्थि नु खो, तात, तुम्हाकं सन्तिके अञ्ञो भिक्खू"ति?

"अत्थि, महाउपासिके, अम्हाकं सन्तिके नागसेनो नाम भिक्खू"ति?

"तेन हि तात अस्सगुत्त, अधिवासेहि नागसेनेन सद्धिं स्वातनाय भत्तं"ति। अधिवासेसि खो आयस्मा अस्सगुत्तो तुण्हीभावेन। अथ खो आयस्मा अस्सगुत्तो तस्सा रत्तिया अच्चयेन पुब्बण्हसमयं निवासेत्वा पत्तचीवरमादाय आयस्मता नागसेनेन सद्धिं पच्छासमणेन येन महाउपासिकाय निवेसनं तेनुपसङ्कमि। उपसङ्कमित्वा पञ्ञत्ते आसने निसीदि। अथ खो सा महाउपासिका आयस्मन्तं अस्सगुत्तं आयस्मन्तं च नागसेनं पणीतेन खादनीयेन भोजनीयेन सहत्था सन्तप्पेसि सम्पवारेसि। अथ खो आयस्मा अस्सगुत्तो भुत्तावि ओनीतपत्तपाणिं आयस्मन्तं नागसेनं एतदवोच—"त्वं, नागसेन, महाउपासिकाय अनुमोदनं करोही"ति इदं वत्वा उट्ठाया'सना पक्कामि।

"साधु भदन्ते"ति पात्रचीवरं प्रतिशाम्य पुनर्दिवसे परिवेणं सम्मार्ज्य मुखोदकं दन्तपवनमुपातिष्ठिपत्। स्थविरः सम्मार्जितस्थानं प्रतिसममार्जीत्। तदुदकं छर्दयित्वाऽन्युदुदकमाहार्षीत्। तच्च दन्तकाष्ठमपनीयान्यद् दन्तकाष्ठमग्रहीत्। नालापसंलापमकार्षीत्। एवं सप्त दिवसान् कृत्वा सप्तमे दिवसे पुनः पृष्ट्वा पुनस्तेन तथैवोक्ते वर्षावासमन्वज्ञासीत्।

## ११—आयुष्मतो नागसेनस्य धर्मदेशना

तेन खलु पुनः समयेनैका महोपासिका आयुष्मन्तमश्वगुप्तं त्रिंशन्मात्राणि वर्षाण्युपास्थात्। अथ खलु सा महोपासिका त्रैमासात्ययेन येनायुष्मानश्वगुप्तस्तेनोपसमक्रमीत्। उपसङ्क्रम्यायुष्मन्तमश्वगुप्तमेतदवोचत्—"अस्ति नु खलु, तात, युष्माकमन्तिकेऽन्यो भिक्षुरि"ति ?

"अस्ति, महोपासिके, अस्माकमन्तिके नागसेनो नाम भिक्षुरि"ति।

"तेन हि, तात अश्वगुप्त, अधिवासय नागसेनेन सार्धं स्वस्तनाय भक्तमि"ति। अध्यवात्सीत् खलु आयुष्मानश्वगुप्तस्तूष्णीम्भावेन। अथ खलु आयुष्मानश्वगुप्तस्तस्या रात्र्या अत्ययेन पूर्वाह्णसमयं निवास्य पात्रचीवरमादायायुष्मता नागसेनेन सार्धं पश्चाच्छ्रमणेन येन महोपासिकाया निवेसनं तेनोपसमक्रमीत्। उपसङ्क्रम्य प्रज्ञप्त आसने न्यषदत्। अथ खलु सा महोपासिका आयुष्मन्तमश्वगुप्तमायुष्मन्तं च नागसेनं प्रणीतेन खादनीयेन भोजनीयेन स्वहस्तात् समतार्प्सीत् सम्प्रयवारीत्। अथ खलु आयुष्मानश्वगुप्तो भुक्तवन्तमवनीतपात्रपाणिमायुष्मन्तं नागसेनमेतदवोचत्—"त्वं, नागसेन, महोपासिकाया अनुमोदनं कुर्वि"तीदमुक्त्वोत्थायासनात् प्राक्रमीत्।

अथ खो सा महाउपासिका आयस्मन्तं नागसेनं एतदवोच–महल्लिका खोहं, तात नागसेन। गम्भीराय धम्मकथाय मय्हं अनुमोदनं करोही" ति। अथ खो आयस्मा नागसेनो तस्सा महाउपासिकाय गम्भीराय धम्मकथाय लोकुत्तराय सुञ्ञतप्पटिसंयुत्ताय अनुमोदनं अकासि। अथ खो तस्सा महाउपासिकाय तस्मिं येव आसने विरजं वीतमलं धम्मचक्खुं उदपादि–"यं किञ्चि समुदयधम्मं सब्बं तं निरोधधम्मं"ति। आयस्मा'पि खो नागसेनो तस्सा महाउपासिकाय अनुमोदनं कत्वा अत्तना देसितं धम्मं पच्चवेक्खन्तो विपस्सनं पट्ठपेत्वा तस्मिं येव आसने निसिन्नो सोतापत्तिफले पतिट्ठासि।

"कल्लो'सि, भन्ते नागसेना"ति।

### ६—को न पटिसन्दहति

राजा आह—"भन्ते नागसेन, अत्थि कोचि मतो न पटिसन्दहती"ति? थेरो आह—"कोचि पटिसन्दहति, कोचि न पटिसन्दहती"ति।

"अर्थेन वयं, महाराज, आर्थिकाः । अर्थे भवतु कथा-संलाप" इति ।

## ५—किमर्था प्रव्रज्या

राजाऽऽह—"किमर्थिका, भदन्त नागसेन, युष्माकं प्रव्रज्या, कश्च युष्माकं परमार्थ" इति ? स्थविर आह—"किमिति, महाराज, इदं दुःखं निरुध्येत, अन्यच्च दुःखं नोत्पद्येतेति, एतदर्था, महाराज, अस्माकं प्रव्रज्या । अनुपादाय परिनिर्वाणं खलु पुनरस्माकं परमार्थ" इति ।

"किम्पुनर्भदन्त नागसेन, सर्वे एतदर्थाय प्रव्रजन्ती"ति ?

"न हि, महाराज । केचिदेतदर्थाय प्रव्रजन्ति, केचिद् राजाभिनीताः प्रव्रजन्ति, केचिच्चौराभिनीताः प्रव्रजन्ति, केचिद् ऋणार्ताः प्रव्रजन्ति, केचिद् आजीविकार्थाय प्रव्रजन्ति । ये पुन सम्यक् प्रव्रजन्ति, ते एतदर्थाय प्रव्रजन्ती"ति ।

"त्वं पुनर्भदन्त एतदर्थाय प्रव्रजितोऽस्मी"ति ?

"अहं खलु, महाराज, दारक सन् प्रव्रजितः । न जानाम्यस्मै नामार्थाय प्रव्रजामीति । अपि च खलु मे एवमभूत्—'पण्डिता इमे श्रमणाः शाक्यपुत्रीयास्ते मा शिक्षयिष्यन्ती'ति । सोऽहं तैः शिक्षितो जानामि च पश्यामि चास्मै नामार्थाय प्रव्रज्ये"ति ।

"कल्योऽसि, भदन्त नागसेने"ति ।

## ६—को न प्रतिसन्दधाति

राजाऽऽह—"भदन्त नागसेन, अस्ति कश्चिन्मृतो न प्रतिसन्दधाती"ति ? स्थविर आह—"कश्चित् प्रतिसन्दधाति, कश्चिन्न प्रतिसन्दधाती"ति ।

"को पटिसन्दहति, को न पटिसन्दहती''ति ?

"सकिलेसो, महाराज, पटिसन्दहति, निक्किलेसो न पटिसन्दहती''ति ।

"त्वं पन, भन्ते नागसेन, पटिसन्दहिस्ससी''ति ?

"सचे, महाराज, सउपादानो भविस्सामि, पटिसन्दहिस्सामि । सचे अनुपादानो भविस्सामि, न पटिसन्दहिस्सामी''ति ।

"कल्लो'सि, भन्ते नागसेना''ति ।

राजा आह–"भन्ते नागसेन, यो न पटिसन्दहति ननु सो योनिसो मनसिकारेन न पटिसन्दहती''ति ?

"योनिसो च, महाराज, मनसिकारेन पञ्ञाय च अञ्ञेहि च कुसलेहि धम्मेही''ति ।

"ननु, भन्ते, योनिसो मनसिकारो येव पञ्ञा''ति ?

"न हि, महाराज । अञ्ञो मनसिकारो, अञ्ञा पञ्ञा । इमेसं खो, महाराज, अजेळकगोणमहिसओट्ठगद्रभानं पि मनसिकारो अत्थि, पञ्ञा पन तेसं नत्थी''ति ।

"कल्लो'सि, भन्ते नागसेना''ति ।

— किंलक्खणो मनसिकारो किंलक्खणा पञ्ञा —

राजा आह–"किंलक्खणो, भन्ते नागसेन, मनसिकारो; किंलक्खणा पञ्ञा''ति ?

"ऊहनलक्खणो खो, महाराज, मनसिकारो; छेदनलक्खणा पञ्ञा''ति ।

"कथं ऊहनलक्खणो मनसिकारो, कथं छेदनलक्खणा पञ्ञा ? ओपम्मं करोही''ति ।

"जानासि त्वं, महाराज, यवलावके''ति ?

"कः प्रतिसन्दधाति, को न प्रतिसन्दधाती"ति ?

"सक्लेशो, महाराज, प्रतिसन्दधाति, निष्क्लेशो न प्रतिसन्दधाती"ति ।

"त्वं पुनर्भदन्त नागसेन, प्रतिसंधास्यसी"ति ?

"चेन्महाराज, सोपादानो भविष्यामि, प्रतिसन्धास्यामि । चेदनुपादानो भविष्यामि, न प्रतिसन्धास्यामी"ति ।

"कल्योऽसि, भदन्त नागसेने"ति ।

राजाऽऽह—"भदन्त नागसेन, यो न प्रतिसन्दधाति ननु स योनिशो मनसिकारेण न प्रतिसन्दधाती"ति ?

"योनिशश्च, महाराज, मनसिकारेण प्रज्ञया चान्यैश्च कुशलैर्धर्मै"रि"ति ।

"ननु, भदन्त, योनिशो मनसिकार एव प्रज्ञे"ति ?

"न हि, महाराज । अन्यो मनसिकारः, अन्या प्रज्ञा । एषा खलु, महाराज, अजेडकगोमहिषोष्ट्रगदभानामपि मनसिकारोऽस्ति, प्रज्ञा पुनस्तेषां नास्ती"ति ।

"कल्योऽसि, भदन्त नागसेने"ति ।

७—किंलक्षणो मनसिकारः किंलक्षणा प्रज्ञा

राजाऽऽह—"किंलक्षणो, भदन्त नागसेन, मनसिकारः; किंलक्षणा प्रज्ञे"ति ?

"ऊहनलक्षणः खलु, महाराज, मनसिकारः, छेदनलक्षणा प्रज्ञे"ति ।

"कथमूहनलक्षणो मनसिकारः, कथं छेदनलक्षणा प्रज्ञा ? औपम्यं कुर्वि"ति ।

"जानासि त्वं, महाराज, यवलावकानि"ति ?

"आम, भन्ते, जानामी"ति ।

"कथं, महाराज, यवलावका यवं लुनन्ती"ति ?

"वामेन, भन्ते, हत्थेन यवकलापं गहेत्वा दक्खिणेन हत्थेन दात्तं गहेत्वा दात्तेन छिन्दन्ती"ति ।

"यथा, महाराज, यवलावको वामेन हत्थेन यवकलापं गहेत्वा दक्खिणेन हत्थेन दात्तं गहेत्वा यवं छिन्दति, एवमेव खो, महाराज, योगावचरो मनसिकारेन मानसं गहेत्वा पञ्ञाय किलेसे छिन्दति । एवं खो, महाराज, ऊहनलक्खणो मनसिकारो, एवं छेदनलक्खणा पञ्ञा"ति ।

"कल्लो'सि, भन्ते नागसेना"ति ।

## ८—कतमे धम्मा कुसला

राजा आह—"भन्ते नागसेन, यं पने'तं ब्रूसि 'अञ्ञेहि च कुसलेहि धम्मेही'ति, कतमे ते कुसला धम्मा"ति ?

"सीलं, महाराज, सद्धा, विरियं, सति, समाधि, इमे ते कुसला धम्मा"ति ।

### (क) किंलक्खणं सीलं

"किंलक्खणं, भन्ते, सील"न्ति ?

"पतिट्ठानलक्खणं, महाराज, सीलं सब्बेसं कुसलानं धम्मानं । इन्द्रियबलबोज्झङ्गमग्गङ्गसतिपट्ठानसम्मप्पधानइद्धिपादझान - विमोक्खसमाधिसमापत्तीनं सीलं पतिट्ठं । सीले पतिट्ठितो खो, महाराज, योगावचरो सीलं निस्साय सीले पतिट्ठाय पञ्चिन्द्रियानि भावेति—'सद्धिन्द्रियं, विरियिन्द्रियं, सतिन्द्रियं, समाधिन्द्रियं पञ्ञिन्द्रियं'ति । सब्बे कुसला धम्मा न परिहायन्ती"ति ।

"आम्, भदन्त, जानामी"ति।

"कथं, महाराज, यवलावका यवं लुनन्ती"ति ?

"वामेन, भदन्त, हस्तेन यवकलापं गृहीत्वा दक्षिणेन हस्तेन दात्रं गृहीत्वा दात्रेण छिन्दन्ती"ति।

"यथा, महाराज, यवलावका वामेन हस्तेन यवकलापं गृहीत्वा दक्षिणेन हस्तेन दात्रं गृहीत्वा यवं छिन्दन्ति, एवमेव खलु, महाराज, योगावचरो मनसिकारेण मानसं गृहीत्वा प्रज्ञया क्लेशान् छिनत्ति। एवं खलु, महाराज, ऊहनलक्षणो मनसिकारः, एवं छेदनलक्षणा प्रज्ञे"ति।

"कल्योऽसि, भदन्त नागसेने"ति।

८—कतमे धर्म्माः कुशलाः

राजाऽऽह—"भदन्त नागसेन, यत् पुनरेतद् ब्रवीषि 'अन्यैश्च कुशलैर्धर्मैरि'ति, कतमे ते कुशला धर्मा"इति ?

"शीलं, महाराज श्रद्धा, वीर्यं, स्मृतिः, समाधिः, इमे ते कुशला धर्मा"इति।

(क) किंलक्खणं सीलं

"किंलक्षणं, भदन्त, शीलमि"ति ?

"प्रतिष्ठानलक्षणं, महाराज, शीलं सर्वेषां कुशलानां धर्माणाम्। इन्द्रियबलबोध्यङ्गमार्गाङ्गस्मृतिप्रस्थानसम्यक्प्रधानऋद्धिपादध्यान-विमोक्षसमाधिसमापत्तीनां शीलं प्रतिष्ठा। शीले प्रतिष्ठितः खलु, महाराज, योगावचरः शीलं निःश्रित्य शीले प्रतिष्ठाय पञ्चेन्द्रियाणि भावयति—'श्रद्धेन्द्रियं, वीर्येन्द्रियं, स्मृतीन्द्रियं, समाधीन्द्रियं, प्रज्ञेन्द्रियमि'ति। सर्वे कुशला धर्मा न परिहीयन्त"इति।

१–"ओपम्मं करोही"ति ।

"यथा, महाराज, ये केचि बीजगामभूतगामा वुड्ढिं विरूळ्हिं वेपुल्लं आपज्जन्ति, सब्बे ते पथविं निस्साय पथवियं पतिट्ठाय वुड्ढिं विरूळ्हिं वेपुल्लं आपज्जन्ति, एवमेव खो, महाराज, योगावचरो सीलं निस्साय सीले पतिट्ठाय पञ्चिन्द्रियानि भावेति–सद्धिन्द्रियं, विरियिन्द्रियं, सतिन्द्रियं, समाधिन्द्रियं, पञ्ञिन्द्रियं"ति ।

२–भिय्यो ओपम्मं करोही"ति ।

"यथा, महाराज ये केचि बलकरणीया कम्मन्ता करीयन्ति सब्बे ते पथविं निस्साय पथवियं पतिट्ठाय करीयन्ति, एवमेव खो, महाराज, योगावचरो सीलं निस्साय सीले पतिट्ठाय पञ्चिन्द्रियानि भावेति–सद्धिन्द्रियं, विरियिन्द्रियं, सतिन्द्रियं, समाधिन्द्रियं, पञ्ञिन्द्रियं"ति ।

३–"भिय्यो ओपम्मं करोही"ति ।

"यथा, महाराज, नगरवड्ढकी नगरं मापेतुकामो पठमं नगरट्ठानं सोधापेत्वा खाणुकण्टकं अपकड्ढापेत्वा भूमिं समं कारापेत्वा ततो अपरभागे वीथिचतुक्कसिङ्घाटकादिपरिच्छेदेन विभजित्वा नगरं मापेति, एवमेव खो, महाराज, योगावचरो सीलं निस्साय सीले पतिट्ठाय पञ्चिन्द्रियानि भावेति–सद्धिन्द्रियं, विरियिन्द्रियं, सतिन्द्रियं, समाधिन्द्रियं, पञ्ञिन्द्रियं"ति ।

४–"भिय्यो ओपम्मं करोही"ति ।

"यथा, महाराज, लङ्घको सिप्पं दस्सेतुकामो पथविं खणापेत्वा सक्खरकथलं अपकड्ढापेत्वा भूमिं समं कारापेत्वा मुदुकाय भूमिया सिप्पं दस्सेति, एवमेव खो, महाराज, योगावचरो सीलं निस्साय सीले पतिट्ठाय पञ्चिन्द्रियानि भावेति–सद्धिन्द्रियं,

१–"औपम्यं कुर्वि"ति ।

"यथा, महाराज, ये केचिद् बीजग्रामभूतग्रामा वृद्धिं विरूढिं वैपुल्यमापद्यन्ते, सर्वे ते पृथिवीं निःश्रित्य पृथिव्यां प्रतिष्ठाय वृद्धिं विरूढिं वैपुल्यमापद्यन्ते, एवमेव खलु, महाराज, योगावचरः शीलं निःश्रित्य शीले प्रतिष्ठाय पञ्चेन्द्रियाणि भावयति–श्रद्धेन्द्रियं, वीर्येन्द्रियं, स्मृतीन्द्रियं, समाधीन्द्रियं, प्रज्ञेन्द्रियमि"ति ।

२–"भूय औपम्यं कुर्वि"ति

यथा, महाराज, ये केचिद् बलकरणीया कर्मान्ताः क्रियन्ते सर्वे ते पृथिवीं निःश्रित्य पृथिव्यां प्रतिष्ठाय क्रियन्ते, एवमेव खलु, महाराज, योगावचरः शीलं निःश्रित्य शीले प्रतिष्ठाय पञ्चेन्द्रियाणि भावयति–श्रद्धेन्द्रियं, वीर्येन्द्रियं, स्मृतीन्द्रियं, समाधीन्द्रियं, प्रज्ञेन्द्रियमि"ति ।

३–"भूय औपम्यं कुर्वि"ति ।

"यथा, महाराज, नगरवर्धकी नगरं मापयितुकामः प्रथमं नगरस्थानं शोधयित्वा स्थाणुकण्टकमपकर्ष्य भूमिं समां कारयित्वा ततोऽपरभागे वीथिचतुष्कशृङ्गाटकादिपरिच्छेदेन विभज्य नगरं मापयति, एवमेव खलु, महाराज, योगावचरः शीलं निःश्रित्य शीले प्रतिष्ठाय पञ्चेन्द्रियाणि भावयति–श्रद्धेन्द्रियं, वीर्येन्द्रियं, स्मृतीन्द्रियं, समाधीन्द्रियं, प्रज्ञेन्द्रियमि"ति ।

४–"भूय औपम्यं कुर्वि"ति ।

"यथा, महाराज, लङ्घकः शिल्पं दर्शयितुकामः पृथिवीं खानयित्वा शर्करकथलमपकर्ष्य भूमिं समां कारयित्वा मृदुकायां भूम्यां शिल्पं दर्शयति, एवमेव, महाराज, योगावचरः शीलं निःश्रित्य शीले प्रतिष्ठाय पञ्चेन्द्रियाणि भावयति–श्रद्धेन्द्रियं,

विरियिन्द्रियं, सतिन्द्रियं, समाधिन्द्रियं, पञ्ञिन्द्रियं'ति । भासितं पेतं, महाराज, भगवता--

'सीले पतिट्ठाय नरो सपञ्ञो चित्तं पञ्ञं च भावयं ।
आतापी निपको भिक्खु सो इमं विजटये जटं'ति ॥
'अयं पतिट्ठा धरणी'व पाणिनं
इदं च मूलं कुसलाभिवुड्ढिया ।
मुखं चि'दं सब्बजिनानुसासने
यो सीलक्खन्धो वरपातिमोक्खियो,' ति ॥
"कल्लो'सि, भन्ते नागसेना''ति ।

### (ख) किंलक्खणा सद्धा

राजा आह--"भन्ते नागसेन, किंलक्खणा सद्धा'ति ?

"सम्पसादनलक्खणा च, महाराज, सद्धा सम्पक्खन्दनलक्खणा चा'ति ।

"कथं, भन्ते, सम्पसादनलक्खणा सद्धा''ति ?

"सद्धा खो, महाराज, उप्पज्जमाना नीवरणे विक्खम्भेति । विनीवरणं चित्तं होति अच्छं विप्पसन्नं अनाविलं । एवं खो, महाराज, सम्पसादनलक्खणा सद्धा''ति ।

१--"ओपम्मं करोही'ति ।

"यथा, महाराज, राजा चक्कवत्ती चतुरङ्गिनिया सेनाय सद्धिं अद्धानमग्गप्पटिपन्नो परित्तं उदकं तरेय्य, तं उदकं हत्थीहि च अस्सेहि च रथेहि च पत्तीहि च खुभितं भवेय्य आविलं लुळितं कललीभूतं । उत्तिण्णो च राजा चक्कवत्ती मनुस्से आणापेय्य--'पानीयं, भणे, आहरथ, पिविस्सामी'ति। रञ्ञो च उदकप्पसादको मणि भवेय्य । 'एवं देवा'ति खो ते मनुस्सा रञ्ञो चक्कवत्तिस्स

वीर्येन्द्रियं, स्मृतीन्द्रियं, समाधीन्द्रिय, प्रज्ञेन्द्रियमिति। भाषितमप्येतद्, महाराज, भगवता–

'शीले प्रतिष्ठाय नरः सप्रज्ञश्चित्तं प्रज्ञां च भावयन्।
आतापी निपको भिक्षु स इमां विजटयेज्जटामि'ति॥

'इयं प्रतिष्ठा धरणीव प्राणिना–
मिदं च मूलं कुशलाभिवृद्धये।
मुखं चेदं सर्वजिनानुशासने
यः शीलस्कन्धो वरप्रातिमोक्ष्य,''इति॥

''कल्पोऽसि, भदन्त नागसेने''ति।

### (ख) किंलक्षणा श्रद्धा

राजाऽऽह–''भदन्त नागसेन, किंलक्षणा श्रद्धे''ति?

''सम्प्रसादनलक्षणा च, महाराज, श्रद्धा सम्प्रस्कन्दनलक्षणा चे''ति।

''कथं, भदन्त, सम्प्रसादनलक्षणा श्रद्धे''ति?

''श्रद्धा खलु, महाराज, उत्पद्यमाना नीवरणानि विस्कम्भयति। विनीवरणं चित्तं भवति अच्छं विप्रसन्नमनाविलम्। एवं खलु, महाराज, सम्प्रसादनलक्षणा श्रद्धे''ति।

१–''औपम्यं कुर्वि''ति।

''यथा महाराज, राजा चक्रवर्ती चतुरङ्गिण्या सेनया सार्धमध्वमार्गप्रतिपन्नः प्रारिक्तमुदकं तरेत्, तदुदकं हस्तिभिश्चाश्वैश्च रथैश्च पत्तिभिश्च क्षुभितं भवेदाविलं लुलितं कललीभूतम्। उत्तीर्णश्च राजा चक्रवर्ती मनुष्यानाज्ञापयेत्–'पानीय, भो, आहरत, पास्यामी'ति। राज्ञश्च उदकप्रसादको मणिर्भवेत्। 'एवं देवे'ति खलु ते मनुष्या राज्ञे चक्रवर्तिने

पटिस्सुत्वा तं उदकप्पसादकं मणिं उदके पक्खिपेय्युं । तस्मिं उदके पक्खित्तमत्ते सङ्खसेवालपणकं विगच्छेय्य, कद्दमो च सन्निसीदेय्य, अच्छं भवेय्य उदकं विप्पसन्नं अनाविलं। ततो रञ्ञो चक्कवत्तिस्स पानीयं उपनामेय्युं–'पिवतु, देव, पानीयं'ति । यथा, महाराज, उदकं, एवं चित्तं दट्ठब्बं । यथा ते मनुस्सा एवं योगावचरो दट्ठब्बो । यथा सङ्खसेवालपणकं कद्दमो च, एवं किलेसा दट्ठब्बा । यथा उदकप्पसादको मणि एवं सद्धा दट्ठब्बा। यथा उदकप्पसादके मणिम्हि उदके पक्खित्तमत्ते सङ्खसेवालपणकं विगच्छेय्य कद्दमो च सन्निसीदेय्य, अच्छं भवेय्य उदकं विप्पसन्नं अनाविलं, एवमेव खो, महाराज, सद्धा उप्पज्जमाना नीवरणे विक्खम्भेति, विनीवरणं चित्तं होति अच्छं विप्पसन्नं अनाविलं। एवं खो, महाराज, सम्पसादनलक्खणा सद्धा''ति ।

''कल्लोसि, भन्ते नागसेना''ति ।

''कथं, भन्ते, सम्पक्खन्दनलक्खणा सद्धा''ति ?

''यथा, महाराज, योगावचरो अञ्ञेसं चित्तं विमुत्तं पस्सित्वा सोतापत्तिफले वा सकदागामिफले वा अनागामिफले वा अरहत्ते वा सम्पक्खन्दति, योगं करोति, अप्पत्तस्स पत्तिया अनधिगतस्स अधिगमाय असच्छिकतस्स सच्छिकिरियाय । एवं खो, महाराज, सम्पक्खन्दनलक्खणा सद्धा''ति ।

१–''ओपम्मं करोही''ति ।

''यथा, महाराज, उपरिपब्बते महामेघो अभिप्पवस्सेय्य । तं उदकं यथानिन्नं पवत्तमानं पब्बतकन्दरपदरसाखा परिपूरेत्वा नदिं परिपूरेय्य । सा उभतो कूलानि संविस्सन्दन्ती गच्छेय्य । अथ महाजनकायो आगन्त्वा तस्सा नदिया उत्तानतं वा गम्भीरतं

प्रतिश्रुत्य तमुदकप्रसादकं मणिमुदके प्रक्षिपेयुः । तस्मिन्नुदके प्रक्षिप्तमात्रे शङ्खशैवालपणकं विगच्छेत्, कर्दमश्च सन्निषीदेत्, अच्छं भवेदुदकं विप्रसन्नमनाविलम् । ततो राज्ञे चक्रवर्तिने पानीयमुपनामयेयुः—'पिबतु, देव, पानीयमि'ति । यथा, महाराज, उदकं, एवं चित्तं द्रष्टव्यम् । यथा ते मनुष्या एवं योगावचरो द्रष्टव्यः । यथा शङ्खशैवालपणकं कर्दमश्च, एवं क्लेशा द्रष्टव्याः । यथोदकप्रसादको मणिरेवं श्रद्धा द्रष्टव्या । यथोदकप्रसादके मणौ उदके प्रक्षिप्तमात्रे शङ्खशैवालपणकं विगच्छेत्, कर्दमश्च सन्निषीदेत्, अच्छं भवेदुदकं विप्रसन्नमनाविलम्, एवमेव खलु, महाराज, श्रद्धा उत्पद्यमाना नीवरणानि विस्कम्भयति, विनीवरणं चित्तं भवति विप्रसन्नमनाविलम् । एवं खलु, महाराज, सम्प्रसादन-लक्षणा श्रद्धे''ति ।

''कल्योऽसि, भदन्त नागसेने''ति ।

''कथं, भदन्त, सम्प्रस्कन्दनलक्षणा श्रद्धे''ति ?

''यथा, महाराज, योगावचरोऽन्येषां चित्तं विमुक्तं दृष्ट्वा स्रोतापत्तिफले वा सकृदागामिफले वाऽनागामिफले वाऽर्हत्त्वे वा सम्प्रस्कन्दति, योगं करोति, अप्राप्तस्य प्राप्तयेऽनधिगतस्याधिगमायासाक्षात्कृतस्य साक्षात्करणाय । एवं खलु, महाराज, सम्प्रस्कन्दनलक्षणा श्रद्धे''ति ।

१—''औपम्यं कुर्वि''ति ।

''यथा, महाराज, उपरिपर्वते महामेघोऽभिप्रवर्षेत् । तदुदकं यथानिम्नं प्रवर्तमानं पर्वतकन्दरप्रदरशाखाः परिपूर्य नदी परि-पूरयेत् । सा उभयतः कूलानि संविस्यन्दन्ती गच्छेत् । अथ महाजनकाय आगत्य तस्या नद्या उत्तानतां वा गम्भीरतां

वा अजानन्तो भीतो वित्थतो तीरे तिट्ठेय्य । अथ'ञ्ञतरो पुरिसो आगन्त्वा अत्तनो थामं च बलं च सम्पस्सन्तो गाळ्हं कच्छं बन्धित्वा पक्खन्दित्वा तरेय्य । तं तिण्णं पस्सित्वा महाजनकायो'पि तरेय्य । एवमेव खो, महाराज, योगावचरो अञ्ञेसं चित्तं विमुत्तं पस्सित्वा सोतापत्तिफले वा सकदागामिफले वा अनागामिफले वा अरहत्ते वा सम्पक्खन्दति, योगं करोति अप्पत्तस्स पत्तिया अनधिगतस्स अधिगमाय, असच्छिकतस्स सच्छिकिरियाय । एवं खो, महाराज, सम्पक्खन्दनलक्खणा सद्धा'ति । भासितं पेतं, महाराज, भगवता संयुत्तनिकायवरे—

'सद्धाय तरती ओघं अप्पमादेन अण्णवं ।
विरियेन दुक्खमच्चेति पञ्ञाय परिसुज्झती'ति ।

"कल्लो'सि, भन्ते नागसेना"ति

(ग) किंलक्खणं विरियं

राजा आह—"भन्ते नागसेन, किंलक्खणं विरियं"ति ?

"उपत्थम्भनलक्खणं, महाराज, विरियं । विरियुपत्थम्भिता सब्बे कुसला धम्मा न परिहायन्ती"ति ।

१—"ओपम्मं करोही"ति ।

"यथा, महाराज, पुरिसो गेहे पतन्ते अञ्ञेन दारुना उपत्थम्भेय्य, उपत्थम्भितं सन्तं एवं तं गेहं न पतेय्य, एवमेव खो, महाराज, उपत्थम्भनलक्खणं विरियं । विरियुपत्थम्भिता सब्बे कुसला धम्मा न परिहायन्ती"ति ।

२—"भिय्यो ओपम्मं करोही" ति ।

"यथा, महाराज, परित्तकं सेनं महती सेना भञ्जेय्य । ततो राजा अञ्ञमञ्ञं अनुस्सारेय्य, अनुपेसेय्य, अत्तनो परित्तकाय

वाऽजानन् भीतो वित्रस्तस्तीरे तिष्ठेत् । अथान्यतरः पुरुष आगत्यात्मनो स्थाम च बलं च सम्पश्यन् गाढं कक्षां बध्वा प्रस्कन्द्य तरेत् । तं तीर्णं दृष्ट्वा महाजनकायोऽपि तरेत् । एवमेव खलु, महाराज, योगावचरोऽन्येषां चित्तं विमुक्तं दृष्ट्वा स्रोतापत्तिफले वा सकृदागामिफले वाऽनागामिफले वाऽर्हत्त्वे वा सम्प्रस्कन्दति, योगं करोति अप्राप्तस्य प्राप्तये, अनधिगतस्याधिगमाय, असाक्षात्कृतस्य साक्षात्करणाय । एवं खलु, महाराज, सम्प्रस्कन्दनलक्षणा श्रद्धेति । भाषितमप्येतन्महाराज, भगवता संयुक्तनिकायवरे—

'श्रद्धया तरत्योघमप्रमादेनार्णवम् ।
वीर्येण दुःखमत्येति प्रज्ञया परिशुध्यती,''ति ॥

''कल्योऽसि, भदन्त नागसेने''ति ।

## (ग) किंलक्षणं वीर्यम्

राजाऽऽह—''भदन्त नागसेन, किंलक्षणं वीर्यमि''ति ?

''उपस्तम्भनलक्षणं, महाराज, वीर्यम् । वीर्योपस्तम्भिता सर्वे कुशला धर्मा न परिहीयन्त इति ।

१—''औपम्यं कुर्वि''ति ।

''यथा, महाराज, पुरुषो गेहे पतति अन्येन दारुणोपस्तम्भयात्, उपस्तम्भितं सदेव तद् गेहं न पतेत्, एवमेव खलु, महाराज, उपस्तम्भनलक्षणं वीर्यम् । वीर्योपस्तम्भिताः सर्वे कुशला धर्मा न परिहीयन्त''इति ।

२—''भूय औपम्यं कुर्वि''ति ।

''यथा, महाराज, परित्तका सेना महती सेना भञ्ज्यात् । ततो राजाऽन्यदन्यदनुसारयेत्, अनुप्रेषयेत्, आत्मनः परित्तकायै

सेनाय बलं अनुपदं ददेय्य । ताय सद्धिं परित्तका सेना महतिं सेनं भञ्जेय्य, एवमेव खो, महाराज, उपत्थम्भनलक्खणं विरियं। विरियूपत्थम्भिता सब्बे कुसला धम्मा न परिहायन्ति । भासितं पेतं, महाराज, भगवता–'वीरियवा खो, भिक्खवे, अरियसावको अकुसलं पजहति, कुसलं भावेति । सावज्जं पजहति, अनवज्जं भावेति । सुद्धमत्तानं परिहरती''ति ।

"कल्लोसि, भन्ते नागसेना''ति ।

### (८) किंलक्खणा सति

राजा आह–"भन्ते नागसेन, किंलक्खणा सती''ति ?

"अपिलापनलक्खणा, महाराज, सति, उपग्गण्हनलक्खणा चा''ति ।

"कथं, भन्ते, अपिलापनलक्खणा सती''ति ?

"सति, महाराज, उप्पज्जमाना कुसलाकुसलसावज्जानवज्ज-हीनप्पणीतकण्हसुक्कसप्पटिभागअप्पटिभागधम्मे अपिलापेति 'इमे चत्तारो सतिपट्ठाना, इमे चत्तारो सम्मप्पधाना, इमे चत्तारो इद्धिपादा, इमानि पञ्चिन्द्रियानि, इमानि पञ्च बलानि, इमे सत्त बोज्झङ्गा, अयं अरियो अट्ठङ्गिको मग्गो, अयं समथो, अयं विपस्सना, अयं विज्जा, अयं विमुत्ती'ति, ततो योगावचरो सेवितब्बे धम्मे सेवति, असेवितब्बे धम्मे न सेवति, भजितब्बे धम्मे भजति, अभजितब्बे धम्मे न भजति । एवं खो, महाराज, अपिलापनलक्खणा सती'' ति ।

१–"ओपम्मं करोही''ति ।

"यथा, महाराज, रञ्ञो चक्कवत्तिस्स भण्डागारिको राजानं चक्कवत्तिं सायं पातं यसं सरापेति–'एत्तका, देव ते हत्थी, एत्तका अस्सा, एत्तका रथा, एत्तका पत्ती, एत्तकं हिरञ्ञं,

सेनायै बलमनुपदं दद्यात् । तया सार्धं प्ररित्तका सेना महतीं सेनां भञ्ज्यात् । एवमेव खलु, महाराज, उपस्तम्भनलक्षणं वीर्यम् । वीर्योपस्तम्भिना सर्वे कुशला धर्मा न परिहीयन्ते । भाषितमप्येतन्महाराज, भगवता–'वीर्यवान् खलु, भिक्षव, आर्यश्रावकोऽकुशलं प्रजहाति, कुशलं भावयति । सावद्यं प्रजहाति, अनवद्यं भावयति । शुद्धमात्मानं परिहरती''ति ।

''कल्योऽसि, भदन्त नागसेने''ति ।

(घ) किंलक्षणा स्मृतिः

राजाऽऽह–''भदन्त नागसेन, किंलक्षणा स्मृतिरि''ति ?

''अपिलापनलक्षणा, महाराज, स्मृतिः, उपग्रहणलक्षणा चे''ति ।

''कथं, भदन्त, अपिलापनलक्षणा स्मृतिरि''ति ?

''स्मृतिर्महाराज, उत्पद्यमाना कुशलाकुशलसावद्यानवद्यहीनप्रणीतकृष्णशुक्लसप्रतिभागाप्रतिभागधर्मानपिलापयति 'इमानि चत्वारि स्मृतिप्रस्थानानि, इमानि चत्वारि सम्यक्प्रधानानि, इमे चत्वारो ऋद्धिपादाः, इमानि पञ्चेन्द्रियाणि, इमानि पञ्च बलानि, इमानि सप्त बोध्यङ्गानि, अयमार्य आष्टाङ्गिको मार्गः, अयं शमथः, इयं विपश्यना, इयं विद्या, इयं विमुक्तिरि'ति. ततो योगावचरः सेवितव्यान् धर्मान् सेवते, असेवितव्यान् धर्मान् न सेवते, भक्तव्यान् धर्मान् भजते, अभक्तव्यान् धर्मान्न भजते । एवं खलु, महाराज, अपिलापनलक्षणा स्मृतिरि''ति ।

१–''औपम्यं कुर्वि''ति ।

''यथा, महाराज, राज्ञश्चक्रवर्तिनो भाण्डागारिको राजानं चक्रवर्तिनं सायं प्रातर्यशः स्मारयति–'एतावन्तो, देव, ते हस्तिनः, एतावन्तोऽश्वाः, एतावन्तो रथाः, एतावन्तः पत्तयः, एतावद् हिरण्यं,

एत्तकं सुवण्णं, एत्तकं सापतेय्यं, तं देवो सरतू'ति रञ्ञो सापतेय्यं अपिलापेति। एवमेव खो, महाराज, सति उप्पज्जमाना कुसलाकुसलसावज्जानवज्जहीनप्पणीतकण्हसुक्कसप्पटिभागअप्पटिभागधम्मे अपिलापेति–'इमे चत्तारो सतिपट्ठाना, इमे चत्तारो सम्मप्पधाना, इमे चत्तारो इद्धिपादा, इमानि पञ्चिन्द्रियानि, इमानि पञ्च बलानि, इमे सत्त बोज्झङ्गा, अयं अरियो अट्ठङ्गिको मग्गो, अयं समथो, अयं विपस्सना, अयं विज्जा, अयं विमुत्ती'ति, ततो योगावचरो सेवितब्बे धम्मे सेवति, असेवितब्बे धम्मे न सेवति, भजितब्बे धम्मे भजति, अभजितब्बे धम्मे न भजति। एवं खो, महाराज, अपिलापनलक्खणा सती''ति।

''कथं, भन्ते, उपग्गण्हनलक्खणा सती''ति ?

''सति, महाराज, उप्पज्जमाना हिताहितानं धम्मानं गतियो समन्वेति–'इमे धम्मा हिता, इमे धम्मा अहिता, इमे धम्मा उपकारा, इमे धम्मा अनुपकारा'ति, ततो योगावचरो अहिते धम्मे अपनुदेति, हिते धम्मे उपग्गण्हाति, अनुपकारे धम्मे अपनुदेति, उपकारे धम्मे उपग्गण्हाति। एवं खो, महाराज, उपग्गण्हनलक्खणा सती''ति।

१–''ओपम्मं करोही''ति।

''यथा, महाराज, रञ्ञो चक्कवत्तिस्स परिणायकरतनं रञ्ञो हिताहिते जानाति–'इमे रञ्ञो हिता इमे अहिता, इमे उपकारा, इमे अनुपकारा'ति; ततो अहिते अपनुदेति, हिते उपग्गण्हाति; अनुपकारे अपनुदेति, उपकारे उपग्गण्हाति। एवमेव खो, महाराज, सति उप्पज्जमाना हिताहितानं धम्मानं गतियो समन्वेति–'इमे

एतावत् सुवर्ण, एतावत् स्वापतेयं, तद् देवः स्मरत्वि'ति राजः स्वापतेयमपिलापयति। एवमेव खलु, महाराज, स्मृतिरुत्पद्यमाना कुशलाकुशलसावद्यानवद्यहीनप्रणीतकृष्णशुक्लसप्रतिभागाप्रतिभागधर्मानपिलापयति–'इमानि चत्वारि स्मृतिप्रस्थानानि, इमानि चत्वारि सम्यक्प्रधानानि, इमे चत्वारो ऋद्धिपादाः, इमानि पञ्चेन्द्रियाणि, इमानि पञ्च बलानि, इमानि सप्त बोध्यङ्गानि, अयमार्य आष्टाङ्गिको मार्गः, अयं शमथः, इयं विपश्यना, इयं विद्या, इयं विमुक्तिरि'ति, ततो योगावचरः सेवितव्यान् धर्मान् सेवते, असेवितव्यान् धर्मान् न सेवते, भक्तव्यान् धर्मान् भजते, अभक्तव्यान् धर्मान् न भजते। एवं, खलु, महाराज, अपिलापनलक्षणा स्मृति''रिति।

"कथं, भदन्त, उपग्रहणलक्षणा स्मृतिरि''ति ?

"स्मृतिर्महाराज, उत्पद्यमाना हिताहिताना धर्माणा गतीः समन्वेति–'इमे धर्मा हिताः, इमे धर्मा अहिताः, इमे धर्मा उपकाराः, इमे धर्मा अनुपकारा'इति, ततो योगावचरोऽहितान् धर्मानपनुदति, हितान् धर्मानुपगृह्णाति, अनुपकारान् धर्मानपनुदति, उपकारान् धर्मानुपगृह्णाति। एवं खलु, महाराज, उपग्रहणलक्षणा स्मृतिरि''ति।

१–"औपम्यं कुर्वि''ति।

"यथा, महाराज, राज्ञश्चक्रवर्तिनः परिणायकरत्नं राज्ञो हिताहितान् जानाति–'इमे राज्ञो हिताः, इमेऽहिताः, इमे उपकाराः, इमेऽनुपकारा'इति; ततोऽहितानपनुदति, हितानुपगृह्णाति, अनुपकारानपनुदति, उपकाराननुगृह्णाति। एवमेव खलु, महाराज, स्मृतिरुत्पद्यमाना हिताहिताना धर्माणा गतीः समन्वेति–'इमे

धम्मा हिता, इमे धम्मा अहिता, इमे धम्मा उपकारा, इमे धम्मा अनुपकारा'ति । ततो योगावचरो अहिते धम्मे अपनुदेति, हिते धम्मे उपग्गण्हाति, अनुपकारे धम्मे अपनुदेति, उपकारे धम्मे उपग्गण्हाति । एवं खो, महाराज, उपग्गण्हनलक्खणा सति । भासितं पेतं, महाराज, भगवता—'सतिं च ख्वा'हं, भिक्खवे, सब्बत्थिकं वदामी''ति ।

"कल्लो'सि, भन्ते नागसेना''ति ।

राजा आह—"भन्ते नागसेन, किंलक्खणो समाधी''ति ?

"पमुखलक्खणो, महाराज, समाधि । ये केचि कुसला धम्मा सब्बे ते समाधिपमुखा होन्ति समाधिनिन्ना समाधिपोणा समाधिपब्भारा''ति ।

१—"ओपम्मं करोही''ति ।

"यथा, महाराज, कूटागारस्स या काचि गोपानसियो सब्बा ता कूटङ्गमा होन्ति कूटनिन्ना कूटसमोसरणा, कूटं तासं अग्गमक्खायति । एवमेव खो, महाराज, ये केचि कुसला धम्मा सब्बे ते समाधिपमुखा होन्ति समाधिनिन्ना समाधिपोणा समाधिपब्भारा''ति ।

२—"भिय्यो ओपम्मं करोही''ति ।

"यथा, महाराज, कोचि राजा चतुरङ्गिनिया सेनाय सद्धिं सङ्गामं ओतरेय्य । सब्बा व सेना हत्थी च अस्सा च रथा च पत्ती च तप्पमुखा भवेय्युं तन्निन्ना तप्पोणा तप्पब्भारा, तं येव अनुपरियायेय्युं । एवमेव खो, महाराज, ये केचि कुसला धम्मा सब्बे ते समाधिपमुखा होन्ति समाधिनिन्ना समाधिपोणा

धर्मा हिता, इमे धर्मा अहिताः, इमे धर्मा उपकाराः, इमे धर्मा अनुपकारा इति । ततो योगावचरोऽहितान् धर्मानपनुदति, हितान् धर्मानुपगृह्णाति, अनुपकारान् धर्मानपनुदति, उपकारान् धर्मानुपगृह्णाति । एवं खलु, महाराज, उपग्रहणलक्षणा स्मृतिः । भाषितमप्येतन्महाराज, भगवता–'स्मृतिं च खल्वहं, भिक्षवः, सर्वार्थिका वदामी''ति ।

"कल्योऽसि, भदन्त नागसेने''ति ।

(ङ) किंलक्षणः समाधिः

राजाऽऽह–"भदन्त नागसेन, किंलक्षणः समाधिरि''ति ?

"प्रमुखलक्षणो, महाराज, समाधि । ये केचित् कुशला धर्मा सर्वे ते समाधिप्रमुखा भवन्ति समाधिनिम्नाः समाधिप्रवणाः समाधिप्राग्भारा''इति ।

१–"औपम्यं कुर्वि''ति ।

"यथा, महाराज, कूटागारस्य याः काश्चिद् गोपानस्यः सर्वास्ताः कूटङ्गमा भवन्ति कूटनिम्ना कूटसमवसरणा, कूटं तासामग्र्यमाख्यायते ; एवमेव खलु, महाराज, ये केचित् कुशला धर्माः सर्वे ते समाधिप्रमुखा भवन्ति समाधिनिम्नाः समाधिप्रवणा समाधिप्राग्भारा''इति ।

२–"भूय औपम्यं कुर्वि''ति ।

"यथा, महाराज, कश्चिद् राजा चतुरङ्गिण्या सेनया सार्धं सङ्ग्राममवतरेत् । सर्वा एव सेना हस्तिनश्चाश्वाश्च रथाश्च पत्तयश्च तत्प्रमुखा भवेयुस्तन्निम्नास्तत्प्रवणास्तत्प्राग्भाराः, तदेवानुपरिययुः । एवमेव खलु, महाराज, ये केचित् कुशला धर्माः सर्वे ते समाधिप्रमुखा भवन्ति समाधिनिम्नाः समाधिप्रवणाः

समाधिपब्भारा । एवं खो, महाराज, पमुखलक्खणो समाधि । भासितं पेतं, महाराज, भगवता–'समाधिं, भिक्खवे, भावेथ । समाहितो, भिक्खवे, भिक्खु यथाभूतं पजानाती''ति ।

"कल्लो'सि, भन्ते नागसेना''ति ।

### (च) किंलक्खणा पञ्ञा

राजा आह––"भन्ते नागसेन, किंलक्खणा पञ्ञा''ति ?

"पुब्बेव खो, महाराज, मया वुत्तं छेदनलक्खणा पञ्ञा''ति । अपि च ओभासनलक्खणा पञ्ञा''ति ।

"कथं, भन्ते, ओभासनलक्खणा पञ्ञा''ति ?

"पञ्ञा, महाराज, उप्पज्जमाना अविज्जन्धकारं विधमेति, विज्जोभासं जनेति, ञाणालोकं विदंसेति, अरियसच्चानि पाकटानि करोति । ततो योगावचरो अनिच्चं'ति वा दुक्खं'ति वा अनत्ता'ति वा सम्मप्पञ्ञाय पस्सती''ति ।

१–"ओपम्मं करोती''ति ।

"यथा, महाराज, पुरिसो अन्धकारे गेहे पदीपं पवेसेय्य । पविट्ठो पदीपो अन्धकारं विधमेति, ओभासं जनेति, आलोकं विदंसेति, रूपानि पाकटानि करोति । एवमेव खो, महाराज, पञ्ञा उप्पज्जमाना अविज्जन्धकारं विधमेति, विज्जोभासं जनेति, ञाणालोकं विदंसेति, अरियसच्चानि पाकटानि करोति । ततो योगावचरो अनिच्चं'ति वा दुक्खं'ति वा अनत्ता'ति वा सम्मप्पञ्ञाय पस्सति । एवं खो, महाराज, ओभासनलक्खणा पञ्ञा''ति ।

"कल्लो'सि, भन्ते नागसेना''ति ।

### (छ) नाना धम्मा एकत्थनिप्फादका

राजा आह–"भन्ते नागसेन, इमे धम्मा नाना सन्ता एकं अत्थं अभिनिप्फादेन्ती''ति ?

समाधिप्राग्भारा । एवं खलु, महाराज, प्रमुखलक्षणः समाधिः । भाषितमप्येतन्महाराज, भगवता–'समाधिं, भिक्षवः, भावयत । समाहितो, भिक्षवो, भिक्षुर्यथाभूतं प्रजानाती''ति ।

"कल्योऽसि, भदन्त नागसेने''ति ।

### ( च ) किंलक्षणा प्रज्ञा

राजाऽऽह–"भदन्त नागसेन, किंलक्षणा प्रज्ञे''ति ?

"पूर्वमेव खलु, महाराज, मयोक्तं छेदनलक्षणा प्रज्ञेति । अपि चावभासनलक्षणा प्रज्ञे''ति ।

"कथं, भदन्त, अवभासनलक्षणा प्रज्ञे''ति ?

"प्रज्ञा, महाराज, उत्पद्यमानाऽविद्यान्धकारं विधमति, विद्यावभासं जनयति, ज्ञानालोकं विदर्शयति, आर्यसत्यानि प्रकटानि करोति । ततो योगावचरोऽनित्यमिति वा दुःखमिति वा अनात्मेति वा सम्यक्प्रज्ञया पश्यती''ति ।

१–"औपम्यं कुर्वि''ति ।

"यथा महाराज, पुरुषोऽन्धकारे गेहे प्रदीपं प्रवेशयेत् । प्रविष्टः प्रदीपोऽन्धकारं विधमति, अवभासं जनयति, आलोकं विदर्शयति, रूपाणि प्रकटानि करोति । एवमेव खलु, महाराज, प्रज्ञा उत्पद्यमानाऽविद्यान्धकारं विधमति, विद्यावभासं जनयति, ज्ञानालोकं विदर्शयति, आर्यसत्यानि प्रकटानि करोति । ततो योगावचरोऽनित्यमिति वा दुःखमिति वाऽनात्मेति वा सम्यक्प्रज्ञया पश्यति । एवं खलु, महाराज, अवभासनलक्षणा प्रज्ञे''ति ।

"कल्योऽसि, भदन्त नागसेने''ति ।

### ( छ ) नाना धर्मा एकार्थनिष्पादकाः

राजाऽऽह–"भदन्त नागसेन, इमे धर्मा नाना सन्त एकमर्थमभिनिष्पादयन्ती''ति ?

"आम, महाराज, इमे धम्मा नाना सन्ता एकं अत्थं अभिनिप्फादेन्ति, किलेसे हनन्ती"ति ।

"कथं, भन्ते, इमे धम्मा नाना सन्ता एकं अत्थं अभिनिप्फादेन्ति, किलेसे हनन्ति ? ओपम्मं करोही"ति ।

"यथा, महाराज सेना नाना सन्ता हत्थी च अस्सा च रथा च पत्ती च, एकं अत्थं अभिनिप्फादेन्ति सङ्गामे परसेनं अभिविजिनन्ति । एवमेव खो, महाराज, इमे धम्मा नाना सन्ता एकं अत्थं अभिनिप्फादेन्ति, किलेसे हनन्ती"ति ।

"कल्लो'सि, भन्ते नागसेना"ति ।

पठमवग्गो

### ६—न च सो, न च अञ्ञो

राजा आह—"भन्ते नागसेन, यो उप्पज्जति सो एव सो उदाहु अञ्ञो"ति ? थेरो आह—"न च सो, न च अञ्ञो"ति ।

१—"ओपम्मं करोही"ति ।

"तं कि मञ्ञसि, महाराज, यदा त्वं दहरो तरुणो मन्दो उत्तानसेय्यको अहोसि, सो एव त्वं एतरहि महन्तो"ति ?

"न हि भन्ते । अञ्ञो सो दहरो तरुणो मन्दो उत्तानसेय्यको अहोसि, अञ्ञो अहं एतरहि महन्तो"ति ।

"एवं सन्ते खो, महाराज, माता ति पि न भविस्सति, पिता'ति पि न भविस्सति, आचरियोति पि न भविस्सति, सिप्पवा ति पि न भविस्सति, सीलवा ति पि न भविस्सति, पञ्ञवा ति पि न भविस्सति । किं नु खो, महाराज, अञ्ञा येव कललस्स माता, अञ्ञा अब्बुदस्स माता, अञ्ञा पेसिया माता, अञ्ञा घनस्स माता, अञ्ञा खुद्दकस्स माता, अञ्ञा महन्तस्स माता, अञ्ञो

"आम, महाराज, इमे धर्मा नाना सन्त एकमर्थमभिनिष्पादयन्ति, क्लेशान् घ्नन्ती"ति ।

"कथं, भदन्त, इमे धर्मा नाना सन्त एकमर्थमभिनिष्पादयन्ति, क्लेशान् घ्नन्ति ? औपम्यं कुर्वि"ति ।

"यथा, महाराज, सेना नाना सन्त्यो हस्तिनश्चाश्वाश्च रथाश्च पत्तयश्चैकमर्थमभिनिष्पादयन्ति सङ्ग्रामे परसेनामभिविजयन्ते । एवमेव खलु, महाराज, इमे धर्मा नाना सन्त एकमर्थमभिनिष्पादयन्ति, क्लेशान् घ्नन्ती"ति ।

"कल्योऽसि, भदन्त नागसेने"ति ।

प्रथम वर्गः

### ६—न च सः, न चान्यः

राजाऽऽह—"भदन्त नागसेन, य उत्पद्यते स एव स उताहो अन्य"इति ? स्थविर आह—"न च स, न चान्य"इति ।

१—"औपम्यं कुर्वि"ति ।

"तत् किं मन्यसे, महाराज, यदा त्वं दारकस्तरुणो मन्द उत्तानशयकोऽभूः, स एव त्वमेतर्हि महान्"ति ?

"न हि, भदन्त । अन्यः स दारकस्तरुणो मन्द उत्तानशयकोऽभूत्, अन्योऽहमेतर्हि महान्"ति ।

"एवं सति खलु, महाराज, मातेत्यपि न भविष्यति, पितेत्यपि न भविष्यति, आचार्य इत्यपि न भविष्यति, शिल्पवानित्यपि न भविष्यति, शीलवानित्यपि न भविष्यति, प्रज्ञावानित्यपि न भविष्यति । किन्तु खलु, महाराज, अन्यैव कललस्य माताऽन्याऽर्बुदस्य माता, अन्या पेश्या माता, अन्या घनस्य माता, अन्या क्षुद्रकस्य माता, अन्या महतो माता, अन्यः

सिप्पं सिक्खति, अञ्ञो सिक्खितो भवति। अञ्ञो पापकम्मं करोति, अञ्ञस्स हत्थपादा छिज्जन्ती"ति।

"न हि, भन्ते। त्वं पन, भन्ते, एवं वुत्ते किं वदेय्यासी"ति? थेरो आह—"अहञ्ञेव खो, महाराज, दहरो अहोसिं तरुणो मन्दो उत्तानसेय्यको, अहञ्ञेव एतरहि महन्तो। इममेव कायं निस्साय सब्बे ते एकसङ्गहिता"ति।

२—"भिय्यो ओपम्मं करोही"ति।

"यथा, महाराज, कोचिदेव पुरिसो पदीपं पदीपेय्य। किं सो सब्बरत्तिं पदीपेय्या"ति?

"आम, भन्ते, सब्बरत्तिं पदीपेय्या"ति।

"किं नु खो, महाराज, या पुरिमे यामे अच्चि, सा मज्झिमे यामे अच्ची"ति?

"न हि, भन्ते"ति।

"या मज्झिमे यामे अच्चि, सा पच्छिमे यामे अच्ची"ति?

"न हि, भन्ते"ति।

"किं नु खो, महाराज, अञ्ञो सो अहोसि पुरिमे यामे पदीपो, अञ्ञो मज्झिमे यामे पदीपो, अञ्ञो पच्छिमे यामे पदीपो"ति?

"न हि, भन्ते। तं येव निस्साय सब्बरत्ति पदीपितो"ति।

"एवमेव खो, महाराज, धम्मसन्तति सन्दहति। अञ्ञो उप्पज्जति, अञ्ञो निरुज्झति, अपुब्बं अचरिमं विय सन्दहति। तेन न च सो, न च अञ्ञो पुरिमविञ्ञाणे पच्छिमविञ्ञाणं सङ्गहं गच्छती"ति।

३—"भिय्यो ओपम्मं करोही"ति।

शिल्पं शिक्षति, अन्यः शिक्षितो भवति। अन्यः पापकर्म करोति, अन्यस्य हस्तपादौ छिद्येते"इति ?

"न हि, भदन्त। त्वं पुनर्भदन्त, एवमुक्ते किं वक्ष्यसी"ति ? स्थविर आह—"अहमेव खलु, महाराज, दारकोऽभूवं तरुणो मन्द उत्तानशयकः, अहमेवैतर्हि महान्। इममेव कायं निश्रित्य सर्वे ते एकसङ्गृहीता"इति।

२—"भूय औपम्यं कुर्वि"ति।

"यथा, महाराज, कश्चिदेव पुरुषः प्रदीपं प्रदीपयेत्। किं स सर्वरात्रि प्रदीपेदि"ति ?

"आम, भदन्त, सर्वरात्रि प्रदीपेदि"ति।

"किन्नु खलु, महाराज, या पूर्वे यामेऽर्चिः, सा मध्यमे यामेऽर्चिरि"ति ?

"न हि, भदन्ते"ति।

"या मध्यमे यामेऽर्चिः, सा पश्चिमे यामेऽर्चिरिति"ति ?

"न हि, भदन्ते"ति।

"किन्नु खलु, महाराज, अन्यः सोऽभूत् पूर्वे यामे प्रदीपः, अन्यो मध्यमे यामे प्रदीपः, अन्यः पश्चिमे यामे प्रदीप"इति ?

"न हि, भदन्त। तमेव निःश्रित्य सर्वरात्रि प्रदीप्त"इति।

"एवमेव, खलु, महाराज, धर्मसन्ततिः सन्दधाति। अन्य उत्पद्यते, अन्यो निरुध्यते, अपूर्वमचरममिव सन्दधाति। तेन न च सः न चान्यः पूर्वविज्ञाने पश्चिमविज्ञानं सङ्ग्रहं गच्छती"ति।

३—"भूय औपम्यं कुर्वि"ति।

"यथा, महाराज, खीरं दुय्हमानं कालन्तरेन दधि परिवत्तेय्य, दधितो नवनीतं, नवनीततो घतं परिवत्तेय्य । यो नु खो, महाराज, एवं वदेय्य–'यं येव खीरं तं येव दधि, यं येव दधि, तं येव नवनीतं, यं येव नवनीतं तं येव घत'न्ति । सम्मा नु खो सो, महाराज, वदमानो वदेय्या"ति ?

"न हि, भन्ते, तं येव निस्साय सम्भूत"न्ति ।

"एवमेव खो, महाराज, धम्मसन्तति सन्दहति । अञ्ञो उप्पज्जति, अञ्ञो निरुज्झति । अपुब्बं अचरिमं विय सन्दहति । तेन न च सो, न च अञ्ञो पुरिमविञ्ञाणे पच्छिमविञ्ञाण सङ्गहं गच्छती"ति ।

"कल्लोसि, भन्ते, नागसेना"ति ।

### १०–जातिक्खयञाण

राजा आह–"भन्ते नागसेन, यो न पटिसन्दहति जानाति सो–'न पटिसन्दहिस्सामी'"ति ?

"आम, महाराज, यो न पटिसन्दहति, जानाति सो–'न पटिसन्दहिस्सामी'"ति ।

"कथं, भन्ते, जानाती"ति ?

"यो हेतु यो पच्चयो, महाराज, पटिसन्दहनाय, तस्स हेतुस्स तस्स पच्चयस्स उपरमा जानाति सो–'न पटिसन्दहिस्सामी'"ति ।

१–"ओपम्मं करोही"ति ।

"यथा, महाराज, कस्सको गहपतिको कसित्वा च वपित्वा च धञ्ञागारं परिपूरेय्य । सो अपरेन समयेन नेव कस्सेय्य, न वपेय्य । यथासम्भतं च धञ्ञं परिभुञ्जेय्य वा विसज्जेय्य वा यथापच्चयं वा करेय्य । जानेय्य सो, महाराज, कस्सको गहपतिको–'न मे धञ्ञागारं परिपूरेस्सती'"ति ।

"यथा, महाराज, क्षीरं दुह्यमानं कालान्तरेण दधि परिवर्तेत, दधिनो नवनीतं, नवनीततो घृतं परिवर्तेत । यो नु खलु, महाराज, एवं वदेत्—'यदेव क्षीरं तदेव दधि, यदेव दधि तदेव नवनीतं, यदेव नवनीतं तदेव घृतमि'ति । सम्यङ् नु खलु स, महाराज, वदन् वदेदि''ति ?

"न हि, भदन्त, तदेव निःश्रित्य सम्भूतमि''ति ।

"एवमेव खलु, महाराज, धर्मसन्तति सन्दधाति । अन्य उत्पद्यते, अन्यो निरुध्यते । अपूर्वमचरममिव सन्दधाति । तेन न च स, न चान्यः पूर्वविज्ञाने पश्चिमविज्ञानं सङ्ग्रहं गच्छती'ति ।

"कल्योऽसि, भदन्त नागसेने''ति ।

१०—ज्ञानप्रज्ञानम्

राजाऽऽह—"भदन्त नागसेन, यो न प्रतिसन्दधाति जानाति स—'नहि प्रतिसन्धास्यामी''ति ?

"आम्, महाराज, यो न प्रतिसन्दधाति जानाति स—'न प्रतिसन्धास्यामी''ति ।

"कथं, भदन्त, जानाती''ति ?

"यो हेतुर्य प्रत्ययो, महाराज, प्रतिसन्धानाय, तस्य हेतोस्तस्यप्रत्ययस्योपरमात् जानाति स.—'न प्रतिसन्धास्यामी''ति ।

१—"औपम्य कुर्वि''ति ।

"यथा, महाराज, कर्षको गृहपतिकः कृष्ट्वा चोप्त्वा च धान्यागारं परिपूरयेत् । सोऽपरेण समयेन नैव कर्षेत्, न वपेत् । यथासम्भृतं च धान्यं परिभुञ्जीत वा विसृजेद् वा यथाप्रत्ययं वा कुर्यात् । जानीयात् स, महाराज, कर्षको गृहपतिकः—'न मे धान्यागारं परिपूर्यिष्यत''इति ?

"आम, भन्ते, जानेय्या"ति ।

"कथं जानेय्याती"ति ?

"यो हेतु यो पच्चयो धञ्ञागारस्स परिपूरणाय, तस्स हेतुस्स तस्स पच्चयस्स उपरमा जानाति–'न मे धञ्ञागारं परिपूरेस्सती'"ति ।

"एवमेव खो, महाराज, यो हेतु यो पच्चयो पटिसन्दहनाय तस्स हेतुस्स तस्स पच्चयस्स उपरमा जानाति सो–'न पटिसन्दहिस्सामी'"ति ।

"कल्लोसि, भन्ते नागसेना"ति ।

### ११—ञाणं च पञ्ञा च

राजा आह–"भन्ते नागसेन, यस्स ञाणं उप्पन्नं, तस्स पञ्ञा उप्पन्ना"ति ?

"आम, महाराज, यस्स ञाणं उप्पन्नं तस्स पञ्ञा उप्पन्ना"ति ।

"किं, भन्ते, यञ्ञेव ञाणं सा येव पञ्ञा"ति ?

"आम, महाराज, यञ्ञेव ञाणं सा येव पञ्ञा"ति ।

"यस्स पन, भन्ते, तं येव ञाणं सा येव पञ्ञा उप्पन्ना, किं सम्मुय्हेय्य सो, उदाहु न सम्मुय्हेय्या"ति ?

"कत्थचि, महाराज, सम्मुय्हेय्य, कत्थचि न सम्मुय्हेय्या"ति ।

"कुहिं, भन्ते, सम्मुय्हेय्या"ति ?

"अञ्ञातपुब्बेसु वा, महाराज, सिप्पट्ठानेसु अगतपुब्बाय वा दिसाय अस्सुतपुब्बाय वा नामपञ्ञत्तिया सम्मुय्हेय्या"ति ।

"कुहिं न सम्मुय्हेय्या"ति ?

"यं खो पन, महाराज, ताय पञ्ञाय कतं अनिच्चं'ति वा दुक्खं'ति वा अनत्ता'ति वा, तहिं न सम्मुय्हेय्या"ति ।

"आम्, भदन्त, जानीयादि"ति ।

"कथं जानीयादि"ति ?

"यो हेतुर्यः प्रत्ययो धान्यागारस्य परिपूरणाय, तस्य हेतोस्तस्य प्रत्ययस्योपरमात् जानाति–'न मे धान्यागारं परिपूरयिष्यते'"इति ।

"एवमेव खलु, महाराज, यो हेतुर्यः प्रत्ययः प्रतिसन्धानाय तस्य हेतोस्तस्य प्रत्ययस्योपरमात् जानाति स –'न प्रतिसन्धास्यामी'"ति ।

"कल्योऽसि, भदन्त नागसेने"ति ।

११—ज्ञानं च प्रज्ञा च

राजाऽऽह–"भदन्त नागसेन, यस्य ज्ञानमुत्पन्नं, तस्य प्रज्ञोत्पन्ने"ति ?

"आम्, महाराज, यस्य ज्ञानमुत्पन्नं तस्य प्रज्ञोत्पन्ने"ति ।

"किं, भदन्त, यदेव ज्ञानं सैव प्रज्ञे"ति ?

"आम्, महाराज, यदेव ज्ञानं सैव प्रज्ञे"ति ।

"यस्य पुनर्भदन्त, तदेव ज्ञानं सैव प्रज्ञा उत्पन्ना किं सम्मुह्येत् स, उताहो न सम्मुह्येदि"ति ?

"कुत्रचिन्महाराज, सम्मुह्येत् कुत्रचिन्न सम्मुह्येदि"ति ।

"कुतो, भदन्त, सम्मुह्येदि"ति ?

"अज्ञातपूर्वेषु वा, महाराज, शिल्पस्थानेषु अगतपूर्वायां वा दिशायामश्रुतपूर्वायां च नामप्रज्ञप्तौ सम्मुह्येदि"ति ।

"कुतो न सम्मुह्येदि"ति ?

"यत् खलु पुनर्महाराज, तया प्रज्ञया कृतमनित्यमिति वा दुःखमिति वाऽनात्मेति वा ततो न सम्मुह्येदि"ति ।

"मोहो पन'स्स, भन्ते, कुहिं गच्छती"ति ?

"मोहो खो, महाराज, ञाणे उप्पन्नमत्ते तत्थेव निरुज्झती"ति।

१—"ओपम्मं करोही"ति।

"यथा, महाराज, कोचिदेव पुरिसो अन्धकारगेहे पदीपं आरोपेय्य, ततो अन्धकारो निरुज्झेय्य, आलोको पातुभवेय्य, एवमेव खो, महाराज, ञाणे उप्पन्नमत्ते मोहो तत्थेव निरुज्झती'ति।

"पञ्ञा पन, भन्ते, कुहिं गच्छती"ति ?

"पञ्ञा पि खो, महाराज, सकिच्चयं कत्वा तत्थेव निरुज्झति। यं पन ताय पञ्ञाय कतं अनिच्चं'ति वा दुक्खं'ति वा अनत्ता'ति वा तं न निरुज्झती"ति।

"भन्ते नागसेन, यं पने'तं ब्रूसि—'पञ्ञा सकिच्चयं कत्वा तत्थेव निरुज्झति। यं पन ताय पञ्ञाय कतं अनिच्चं'ति वा दुक्खं'ति वा अनत्ता'ति वा तं न निरुज्झती'ति, २—तस्स ओपम्मं करोही"ति।

"यथा, महाराज, यो कोचि पुरिसो रत्ति लेखं पेसेतुकामो लेखकं पक्कोसापेत्वा पदीपं आरोपेत्वा लेखं लिखापेय्य, लिखिते पन लेखे पदीपं विज्झापेय्य। विज्झापिते'पि पदीपे लेखं न विनस्सेय्य। एवमेव खो, महाराज, पञ्ञा सकिच्चयं कत्वा तत्थेव निरुज्झति, यं पन ताय पञ्ञाय कतं अनिच्चं'ति वा दुक्खं'ति वा अनत्ता'ति वा तं न निरुज्झती"ति।

३—"भिय्यो ओपम्मं करोही"ति।

"यथा, महाराज, पुरत्थिमेसु जनपदेसु मनुस्सा अनुघरं पञ्च पञ्च उदकघटकानि ठपेन्ति आलिम्पनं विज्झापेतुं। घरे पदित्ते तानि पञ्च उदकघटकानि घरस्सूपरि खिपन्ति। ततो अग्गि विज्झायति। किन्नु खो, महाराज, तेसं मनुस्सानं एवं होति—'पुन तेहि घटेहि घटकिच्चं करिस्सामा'"ति ?

"मोहः पुनरस्य, भदन्त, कुतो गच्छती"ति ?

"मोहः खलु महाराज, ज्ञाने उत्पन्नमात्रे तत्रैव निरुध्यत"इति ।

१-"औपम्यं कुर्वि"ति ।

"यथा, महाराज, कश्चिदेव पुरुषोऽन्धकारगेहे प्रदीपमारोपयेत्, ततोऽन्धकारो निरुध्यात्, आलोकः प्रादुर्भवेत्, एवमेव खलु, महाराज, ज्ञाने उत्पन्नमात्रे मोहस्तत्रैव निरुध्यत"इति ।

"प्रज्ञा पुनर्भदन्त कुतो गच्छती"ति ?

"प्रज्ञाऽपि खलु, महाराज, स्वकृत्यं कृत्वा तत्रैव निरुध्यति । यत्पुनस्तया प्रज्ञया कृतमनित्यमिति वा दुःखमिति वाऽनात्मेति वा तं न निरुध्यती"ति ।

"भदन्त, नागसेन, यत्पुनरेतद् ब्रवीषि-'प्रज्ञा स्वकृत्यं कृत्वा तत्रैव निरुध्यते । यत्पुनस्तया प्रज्ञया कृतमनित्यमिति वा दुःखमिति वाऽनात्मेति वा तन्न निरुध्यति'इति, २-तस्यौपम्यं कुर्वि"ति ।

"यथा, महाराज, यः कश्चित् पुरुषो रात्रौ लेखं प्रेषयितुकामो लेखकं प्रक्रोश्य प्रदीपमारोप्य लेखं लेखयेत् । लिखिते पुनर्लेखे प्रदीपं विध्मापयेत् । विध्मापितेऽपि प्रदीपे लेखो न विनश्येत् । एवमेव खलु, महाराज, प्रज्ञा स्वकृत्यं कृत्वा तत्रैव निरुध्यते, यत्पुनस्तया प्रज्ञया कृतमनित्यमिति वा दुःखमिति वाऽनात्मेति वा तन्न निरुध्यत"इति ।

३-"भूय औपम्यं कुर्वि"ति ।

"यथा, महाराज, पौरस्त्येषु जनपदेषु मनुष्या अनुगृहं पञ्च पञ्चोदकघटकानि स्थापयन्ति आलेपनं विध्यापयितुम् । गृहे प्रदीप्ते तानि पञ्च पञ्चोदकघटकानि गृहस्योपरि क्षिपन्ति । ततोऽग्निर्विध्मायते । किन्नु खलु, महाराज, तेषां मनुष्याणामेवं भवति -'पुनस्तैर्घटैर्घटकृत्यं करिष्याम'"इति ?

"न हि, भन्ते । अलं तेहि घटेहि । किं तेहि घटेही"ति ।

"यथा, महाराज, पञ्च उदकघटकानि, एवं पञ्चिन्द्रियानि दट्ठब्बानि—सद्धिन्द्रियं, वीरियिन्द्रियं, सतिन्द्रियं, समाधिन्द्रियं, पञ्ञिन्द्रियं । यथा ते मनुस्सा, एवं योगावचरो दट्ठब्बो । यथा अग्गि, एवं किलेसा दट्ठब्बा । यथा पञ्चहि उदकघटकेहि अग्गि विज्झापियति, एवं पञ्चिन्द्रियेहि किलेसा विज्झापियन्ति । विज्झापिता पि किलेसा न पुन सम्भवन्ति । एवमेव खो, महाराज, पञ्ञा साकिच्चयं कत्वा तत्थेव निरुज्झति, यं पन ताय पञ्ञाय कतं अनिच्चं'ति वा दुक्खं' ति वा अनत्ता'ति वा नं न निरुज्झती"ति ।

४—"भिय्यो ओपम्मं करोही"ति ।

"यथा, महाराज, वेज्जो पञ्चमूलभेसज्जानि गहेत्वा गिलानकं उपसङ्कमित्वा तानि पञ्चमूलभेसज्जानि पिसित्वा गिलानकं पायेय्य, तेहि च दोसा निद्धमेय्युं । किं नु खो, महाराज, तस्स वेज्जस्स एवं होति—'पुन तेहि पञ्चमूलभेसज्जेहि भेसज्जकिच्चं करिस्सामी'"ति ?

"न हि, भन्ते ? अलं तेहि पञ्चमूलभेसज्जेहि । किं तेहि पञ्चमूलभेसज्जेही"ति ।

"यथा, महाराज, पञ्चमूलभेसज्जानि, एवं पञ्चिन्द्रियानि दट्ठब्बानि—सद्धिन्द्रियं वीरियिन्द्रियं, सतिन्द्रियं, समाधिन्द्रियं, पञ्ञिन्द्रियं । यथा वेज्जो, एवं योगावचरो दट्ठब्बो । यथा ब्याधि, एवं किलेसा दट्ठब्बा । यथा ब्याधितो पुरिसो, एवं पुथुज्जनो दट्ठब्बो । यथा पञ्चमूलभेसज्जेहि गिलानस्स दोसा निद्धन्ता, दोसे निद्धन्ते गिलानो अरोगो होति, एवं पञ्चिन्द्रियेहि किलेसा निद्धमीयन्ति । निद्धमिता च किलेसा न पुन सम्भवन्ति । एवमेव खो, महाराज, पञ्ञा सकिच्चयं

"न हि, भदन्त ! अलं तैर्घटैः । किं तैर्घटैरि"ति ।

"यथा, महाराज, पञ्चोदकघटकानि एवं पञ्चेन्द्रियाणि द्रष्टव्यानि—श्रद्धेन्द्रियं, वीर्येन्द्रियं, स्मृतीन्द्रियं, समाधीन्द्रियं, प्रज्ञेन्द्रियम । यथा ते मनुष्या एवं योगावचरो द्रष्टव्य । यथाऽग्नि-रेवं क्लेशा द्रष्टव्या । यथा पञ्चभिरुदकघटकैरग्निर्विध्माप्यते, एवं पञ्चेन्द्रियैः क्लेशा विध्माप्यन्ते । विध्मापिता अपि क्लेशा न पुन सम्भवन्ति । एवमेव खलु, महाराज, प्रज्ञा स्वकृत्यं कृत्वा तत्रैव निरुध्यते, यत्पुनस्तया प्रज्ञया कृतमनित्यमिति वा दुःखमिति वाऽनात्मेति वा तन्न निरुध्यत"इति ।

४—"भूय औपम्यं कुर्वि"ति ।

"यथा, महाराज, वैद्यः पञ्चमूलभैषज्यानि गृहीत्वा ग्लानक-मुपसङ्क्रम्य तानि पञ्चमूलभैषज्यानि पिष्ट्वा ग्लानकं पाययेत्, तैश्च दोषा निर्धमेयु । किन्नु खलु, महाराज, तस्य वैद्यस्यैवं भवति—'पुनस्तैः पञ्चमूलभैषज्यैर्भैषज्यकृत्यं करिष्यामी'"ति ?

"नहि, भदन्त, अलं तैः पञ्चमूलभैषज्यैः । किं तैः पञ्चमूल-भैषज्यैरि"ति ।

"यथा, महाराज, पञ्चमूलभैषज्यानि, एवं पञ्चेन्द्रियाणि द्रष्टव्यानि—श्रद्धेन्द्रियं, वीर्येन्द्रियं, स्मृतीन्द्रियं समाधीन्द्रियं प्रज्ञेन्द्रियम् । यथा वैद्य एवं योगावचरो द्रष्टव्य । यथा व्याधिरेवं क्लेशा द्रष्टव्याः । यथा व्याधितः पुरुष एवं पृथग्जनो द्रष्टव्यः । यथा पञ्चमूलभैषज्यैर्ग्लानस्य दोषा निर्धमाताः, दोषे निर्धमिते ग्लानोऽरोगो भवति, एवं पञ्चेन्द्रियैः क्लेशा निर्धमायन्ते । निर्धमाताश्च क्लेशा न पुनः सम्भवन्ति । एवमेव खलु, महाराज, प्रज्ञा स्वकृत्यं

कत्वा तत्थेव निरुज्झति। यं पन ताय पञ्ञाय कतं अनिच्चं'ति वा दुक्खं'ति वा अनत्ता'ति वा तं न निरुज्झती''ति।

५—"भिय्यो ओपम्मं करोही''ति।

"यथा, महाराज, सङ्गामावचरो योधो पञ्च कण्डानि गहेत्वा सङ्गामं ओतरेय्य परसेनं विजेतुं। सो सङ्गामगतो तानि पञ्च कण्डानि खिपेय्य। तेहि च परसेना भिज्जेय्य। किन्नु खो, महाराज, तस्स सङ्गामावचरस्स योधस्स एवं होति—'पुन तेहि कण्डेहि कण्डकिच्चं करिस्सामी''ति?

"न हि, भन्ते। अलं तेहि कण्डेहि, किं तेहि कण्डेही''ति।

"यथा, महाराज, पञ्च कण्डानि, एवं पञ्चिन्द्रियानि दट्ठब्बानि—सद्धिन्द्रियं, वीरियिन्द्रियं, सतिन्द्रियं, समाधिन्द्रियं, पञ्ञिन्द्रियं। यथा, महाराज, सङ्गामावचरो योधो, एवं, महाराज, योगावचरो दट्ठब्बो। यथा परसेना, एवं किलेसा दट्ठब्बा। यथा पञ्चहि कण्डेहि परसेना भिज्जति, एवं पञ्चिन्द्रियेहि किलेसा भिज्जन्ति। भग्गा च किलेसा न पुन सम्भवन्ति। एवमेव खो, महाराज, पञ्ञा सकिच्चयं कत्वा तत्थेव निरुज्झति। यं पन ताय पञ्ञाय कतं अनिच्चं'ति वा दुक्खं'ति वा अनत्ता'ति वा, तं न निरुज्झती''ति।

"कल्लो'सि, भन्ते नागसेना''ति।

## १२—कायिका चेतसिका च वेदना

राजा आह—"भन्ते नागसेन, यो न पटिसन्दहति वेदेति सो किञ्चि दुक्खं वेदनं''ति? थेरो आह—"किञ्चि वेदेति किञ्चि न वेदेती''ति।

"किं वेदेति, किं न वेदेती''ति?

कृत्वा तत्रैव निरुध्यते । यत्पुनस्तया प्रज्ञया कृतमनित्यमिति वा दुःखमिति वा तन्न निरुध्यत''इति ।

५–''भूय औपम्यं कुर्वि''ति ।

''यथा, महाराज, सङ्ग्रामावचरो योधः पञ्च काण्डानि गृहीत्वा संङ्ग्राममवतरेत् परसेना विजेतुम् । स संङ्ग्रामगतस्तानि पञ्च काण्डानि क्षिपेत् । तैश्च परसेना भिद्येत । किन्नु खलु, महाराज, तस्य संङ्ग्रामावचरस्य योधस्यैवं भवति–'पुनस्तैः काण्डैः काण्डकृत्यं करिष्यामी''ति ?

''न हि, भदन्त, अलं तैः काण्डैः, किं तैः काण्डैरि''ति ।

''यथा, महाराज, पञ्च काण्डानि एवं पञ्चेन्द्रियाणि द्रष्टव्यानि– श्रद्धेन्द्रियं, वीर्येन्द्रियं, स्मृतीन्द्रियं, समाधीन्द्रियं, प्रज्ञेन्द्रियम् । यथा, महाराज, सङ्ग्रामावचरो योधः, एवं, महाराज, योगावचरो द्रष्टव्यः । यथा परसेना, एवं क्लेशा द्रष्टव्याः । यथा पञ्चभिः काण्डैः परसेना भिद्यते, एवं पञ्चेन्द्रियैः क्लेशा भिद्यन्ते । भग्नाश्च क्लेशा न पुनः सम्भवन्ति । एवमेव खलु, महाराज, प्रज्ञा स्वकृत्यं कृत्वा तत्रैव निरुध्यते । यत्पुनस्तया प्रज्ञया कृतमनित्यमिति वा दुःखमिति वाऽनात्मेति वा, तन्न निरुध्यती''ति ।

''कल्योऽसि, भदन्त नागसेने''ति ।

## १२—कायिकी चैतसिकी च वेदना

राजाऽऽह–''भदन्त नागसेन, यो न प्रतिसन्दधाति वेदयति स किञ्चिद् दुःखा वेदनामि''ति ?स्थविर आह–''किञ्चिद् वेदयति, किञ्चिन्न वेदयति''ति ।

''किं वेदयती, किं न वेदयती''ति ?

"कायिकं, महाराज, वेदनं वेदेति, चेतसिकं वेदनं न वेदेती"ति ।

"कथं, भन्ते, कायिकं वेदनं वेदेति, कथं चेतसिकं वेदनं न वेदेती"ति ?

"यो हेतु यो पच्चयो कायिकाय दुक्खवेदनाय उप्पत्तिया, तस्स हेतुस्स तस्स पच्चयस्स अनुपरमा कायिकं दुक्खवेदनं वेदेति; यो हेतु यो पच्चयो चेतसिकाय दुक्खवेदनाय उप्पत्तिया, तस्स हेतुस्स तस्स पच्चयस्स उपरमा चेतसिकं दुक्खवेदनं न वेदेति । भासितं पेतं, महाराज, भगवता—'सो एकं वेदनं वेदेति कायिकं न चेतसिकं'"ति ।

"भन्ते नागसेन, यो दुक्खं वेदनं वेदेति, कस्मा सो न परिनिब्बायती"ति ?

"नत्थि, महाराज, अरहतो अनुनयो वा पटिघो वा । न च अरहन्तो अपक्कं पातेन्ति । परिपाकं आगमेन्ति पण्डिता । भासितं पेतं, महाराज, थेरेन सारिपुत्तेन धम्मसेनापतिना—

'नाभिनन्दामि मरणं नाभिनन्दामि जीवितं ।
कालं च पटिकङ्खामि निब्बिसं भतको यथा' ॥
'नाभिनन्दामि मरणं नाभिनन्दामि जीवितं ।
कालं च पटिकङ्खामि सम्पजानो पटिस्सुतो'"ति ।

"कल्लो'सि, भन्ते नागसेना"ति ।

## १३–वेदनायो

राजा आह—"भन्ते नागसेन, सुखा वेदना कुसला वा अकुसला वा अब्याकता वा"ति ।

"सिया, महाराज, कुसला, सिया अकुसला, सिया अब्याकता"ति ।

"कायिकी, महाराज, वेदनां वेदयति, चैतसिकी वेदनां न वेदयती"ति ।

"कथं, भदन्त, कायिकी वेदनां वेदयति, कथं चैतसिकी वेदना न वेदयती"ति ?

"यो हेतुर्यः प्रत्ययः कायिक्या दुःखवेदनाया उत्पत्तेः, तस्य हेतोस्तस्य प्रत्ययस्यानुपरमात् कायिकी दुःख वेदनां वेद, यो हेतुर्यः प्रत्ययश्चैतसिक्या दुःखवेदनाया उत्पत्तेः, तस्य हेतोस्तस्य प्रत्ययस्योपरमाच्चैतसिकी दुःखवेदना न वेद । भाषितं पुनरेतन्महाराज, भगवता– स एका वेदना वेदयति कायिकी न चैतसिकीमि"ति ।

"भदन्त नागसेन, य दुःखा वेदना वेदयति, कस्मात् स न परिनिर्वायत"इति ?

"नास्ति, महाराज, अर्हतोऽनुनयो वा प्रतिघो वा । न चार्हन्तोऽपक्वं पातयन्ति । परिपाकमागमयन्ति पण्डिताः । भाषितं पुनरेतन्महाराज, स्थविरेण सारिपुत्रेण धर्मसेनापतिना–

'नाभिनन्दामि मरणं नाभिनन्दामि जीवितम ।
कालं च प्रतिकाङ्क्षामि निर्वेशं भृतको यथा' ॥
'नाभिनन्दामि मरणं नाभिनन्दामि जीवितम् ।
कालं च प्रतिकाङ्क्षामि सम्प्रजानान प्रतिश्रुत"इति ॥

"कल्योऽसि, भदन्त नागसेन"ति ।

## १३—वेदना

राजाऽऽह–"भदन्त नागसेन, सुखा वेदना कुशला वाऽकुशला वाऽव्याकृता वे"ति ?

"स्यान्महाराज, कुशला, स्यादकुशला, स्यादव्याकृते"ति ।

"यदि, भन्ते, कुसला न दुक्खा, यदि दुक्खा न कुसला, कुसलं दुक्खं'ति नुप्पज्जती"ति ।

"तं किं मञ्ञसि, महाराज, इध पुरिसस्स हत्थे तत्तं अयोगुळं निक्खिपेय्य, दुतिये हत्थे सीतं हिमपिण्डं निक्खिपेय्य । किं नु खो, महाराज, उभो'पि ते दहेय्युं"ति ?

"आम, भन्ते, उभो'पि ते दहेय्युं"ति ।

"किं नु खो ते, महाराज, उभो'पि उण्हा"ति ?

"न हि, भन्ते"ति ।

"किं पन ते, महाराज, उभो पि सीतला"ति ?

"न हि, भन्ते"ति ।

"आजानाहि निग्गहं । यदि तत्तं दहति, न च ते उभो पि उण्हा । तेन नुप्पज्जति । यदि सीतलं दहति, न च ते उभो पि सीतला । तेन नुप्पज्जति । किस्स पन ते, महाराज, उभो पि दहन्ति न च ते उभो पि उण्हा, न च ते उभो पि सीतला । एकं उण्हं एकं सीतलं उभो पि ते दहन्ति । तेन नुप्पज्जती"ति ।

"नाहं पटिबलो तया वादिना सद्धिं सल्लपितुं । साधु, अत्थं जप्पेही"ति ।

ततो थेरो अभिधम्मसंयुत्ताय कथाय राजानं मिलिन्दं सञ्ञापेसि–"छयिमानि, महाराज, गेहनिस्सितानि सोमनस्सानि, छ नेक्खम्मनिस्सितानि सोमनस्सानि । छ गेहनिस्सितानि दोमनस्सानि, छ नेक्खम्मनिस्सितानि दोमनस्सानि । छ गेहनिस्सिता उपेक्खा, छ नेक्खम्मनिस्सिता उपेक्खा'ति इमानि छ छक्कानि । अतीता'पि छत्तिंसविधा वेदना, अनागता'पि

"यदि, भदन्त, कुशला न दुःखा, यदि दुःखा न कुशला, कुशलं दुःखमिति नोत्पद्यत"इति ।

"तत्कि मन्यसे, महाराज, इह पुरुषस्य हस्ते तप्तमयोगुलं निक्षिप्येत, द्वितीये हस्ते शीतं हिमपिण्डं निक्षिप्येत । किं नु खलु, महाराज, उभे अपि ते दहेतामि"ति ?

"आम् , महाराज, उभे अपि ते दहेतामि"ति ।

"किन्नु खलु ते उभे अप्युष्णे"इति ?

"न हि, भदन्ते"ति ।

"किम्पुनस्ते, महाराज, उभे अपि शीतले" इति ?

"न हि, भदन्ते"ति ।

"आजानीहि निग्रहम् । यदि तप्तं दहति, न च ते उभे अप्युष्णे । तेन नोत्पद्यते । यदि शीतलं दहति, न च ते उभे अपि शीतले । तेन नोत्पद्यते । कस्मात् पुनस्ते, महाराज, उभे अपि दहतो न च ते उभे अप्युष्णे, न च ते उभे अपि शीतले । एकमुष्णमेकं शीतलमुभे अपि ते दहतः । तेन नोत्पद्यत"इति ।

"नाहं प्रतिबलस्त्वया वादिना सार्धं संलपितुम् । साधु, अर्थं जल्पे"ति ।

ततः स्थविरोऽभिधर्मसंयुक्तया कथया राजानं मिलिन्दं समजिज्ञपत्–"षडिमानि, महाराज, गेहनिःश्रितानि सौमनस्यानि, षड् नैष्क्रम्यनिःश्रितानि सोमनस्यानि । षड् गेहनिःश्रितानि दौर्मनस्यानि, षड् नैष्क्रम्यनिःश्रितानि दौर्मनस्यानि । षड् गेहनिःश्रिता उपेक्षाः, षड्नैष्क्रम्यनिःश्रिता उपेक्षा इतीमानि षट् षट्काणि । अतीताऽपि षट्त्रिंशद्विधा वेदना, अनागताऽपि

छत्तिंसविधा वेदना, पच्चुप्पन्ना'पि छत्तिंसविधा वेदना, तदेकज्झं अभिसञ्ञूहित्वा अभिसम्पिण्डेत्वा अट्ठसतं वेदना होन्ती''ति।

''कल्लो'सि, भन्ते नागसेना''ति ।

### १४—को पटिसन्दहति

राजा आह—''भन्ते नागसेन, को पटिसन्दहती''ति ? थेरो आह—''नामरूपं खो, महाराज, पटिसन्दहती''ति ।

''किं इमं येव नामरूपं पटिसन्दहती''ति ?

''न खो, महाराज, इमं येव नामरूपं पटिसन्दहति । इमिना पन महाराज, नामरूपेन कम्मं करोति सोभणं वा पापकं वा । तेन कम्मेन अञ्ञं नामरूपं पटिसन्दहती''ति ।

''यदि, भन्ते, न इमं येव नामरूपं पटिसन्दहति, ननु सो मुत्तो भविस्सति पापकेहि कम्मेही''ति ? थेरो आह—''यदि न पटिसन्दहेय्य मुत्तो भवेय्य पापकेहि कम्मेहि । यस्मा च खो महाराज, पटिसन्दहति, तस्मा न मुत्तो पापकेहि कम्मेही''ति ।

''ओपम्मं करोही''ति ।

''यथा, महाराज, कोचिदेव पुरिसो अञ्ञतरस्स पुरिसस्स अम्बं अवहरेय्य । तमेनं अम्बसामिको गहेत्वा रञ्ञो दस्सेय्य— 'इमिना, देव, पुरिसेन मय्हं अम्बा अवहटा'ति । सो एवं वदेय्य— 'ना'हं, देव, इमस्स अम्बे अवहरामि । अञ्ञे ते अम्बा ये इमिना रोपिता । अञ्ञे ते अम्बा ये मया अवहटा । ना'हं दण्डप्पत्तो'ति । किं नु खो सो, महाराज, पुरिसो दण्डप्पत्तो भवेय्या''ति ?

''आम, भन्ते, दण्डप्पत्तो भवेय्या''ति ।

''केन कारणेना''ति ?

षट्त्रिंशद्विधा वेदनाः, प्रत्युत्पन्ना अपि षट्त्रिंशद्विधा वेदनाः तदेकत्राभिसमूह्याभिसम्पिण्ड्याष्टशतं वेदना भवन्तो''ति ।

''कल्योऽसि, भदन्त नागसेने''ति ।

### १४--कः प्रतिसन्दधाति

राजाऽऽह--''भदन्त नागसेन, कः प्रतिसन्दधाती''ति ? स्थविर आह--''नामरूपं खलु, महाराज, प्रतिसन्दधाती''ति ।

''किमिदमेव नामरूपं प्रतिसन्दधाती''ति ?

''न खलु, महाराज, इदमेव नामरूपं प्रतिसन्दधाति । अनेन पुनर्महाराज, नामरूपेण कर्म करोति शोभनं वा पापकं वा । तेन कर्मणाऽन्यन्नामरूपं प्रतिसन्दधाती''ति ।

''यदि, भदन्त, नेदमेव नामरूपं प्रतिसन्दधाति, ननु स मुक्तो भविष्यति पापकैः कर्मभिरि''ति ? स्थविर आह--''यदि न प्रतिसन्दध्यान्मुक्तो भवेत् पापकैः कर्मभिः । यस्माच्च खलु, महाराज, प्रतिसन्दधाति, तस्मान्न मुक्तः पापकैः कर्मभिरि''ति ।

''--''औपम्यं कुरु''ति ।

"यथा, महाराज, कश्चिदेव पुरुषो राज्ञोऽधिकारं कारयेत् । तस्मै राजा तुष्टोऽधिकारं दद्यात् । स तेनाधिकारेण पञ्चभि कामगुणै. समर्पितः समङ्गीभूतः परिचरेत् । तस्यैवं स्यात्–'मया खलु पूर्वं राज्ञोऽधिकारः कृतः, तस्मान्मे राजा तुष्टोऽधिकारमदात् । सोऽहं ततोनिदानामिमामेवंरूपां वेदनां वेदयामी'ति । यथा वा पुनर्महाराज, कश्चिदेव पुरुष. कुशलं कर्म कृत्वा कायस्य भेदात् परं मरणात् सुगति स्वर्गं लोकमुपपद्येत । स च तत्र दिव्यैः पञ्चभिः कामगुणैः समर्पितः

समङ्गिभूतो परिचरेय्य । तस्स एवमस्स–'स्वा'हं खो पुब्बे कुसलं कम्मं अकासिं, सो'हं ततोनिदानं इमं एवरूपं वेदनं वेदियामी'ति । एवमेव खो, महाराज, वेदयितलक्खणा वेदना, अनुभवनलक्खणा चा''ति ।

''कल्लो'सि, भन्ते नागसेना''ति ।

(ग) किंलक्खणा सञ्ञा

''भन्ते नागसेन, किंलक्खणा सञ्ञा''ति ?

''सञ्जाननलक्खणा, महाराज, सञ्ञा''ति ।

''किं सञ्जानना''ति ?

''नीलं पि सञ्जानाति, पीतं पि सञ्जानाति, लोहितं पि सञ्जानाति, ओदातं पि सञ्जानाति, मञ्जिट्ठं पि सञ्जानाति । एवमेव खो, महाराज, सञ्जाननलक्खणा सञ्ञा''ति ।

१–''ओपम्मं करोही''ति ।

''यथा, महाराज, रञ्ञो भण्डागारिको भण्डागारं पविसित्वा नीलपीतलोहितोदातमञ्जेट्ठानि राजभोगानि रूपानि पस्सित्वा सञ्जानाति, एवमेव खो, महाराज, सञ्जाननलक्खणा सञ्ञा''ति ।

''कल्लो'सि, भन्ते नागसेना''ति ।

(घ) किंलक्खणा चेतना

''भन्ते नागसेन, किंलक्खणा चेतना''ति ?

''चेतयितलक्खणा, महाराज, चेतना, अभिसङ्खरणलक्खणा चा''ति ।

१–''ओपम्मं करोही''ति ।

''यथा, महाराज, कोचिदेव पुरिसो विसं अभिसङ्खरित्वा अत्तना च पिवेय्य, परे च पायेय्य । सो अत्तना'पि दुक्खितो भवेय्य,

समङ्गीभूतः परिचरेत्। तस्यैवं स्यात्—'सोऽहं खलु पूर्वं कुशलं कर्माकार्षम्, सोऽहं ततोनिदानामिमामेवंरूपां वेदनां वेदयामी'ति। एवमेव खलु, महाराज, वेदयितलक्षणा वेदना, अनुभवनलक्षणा चे"ति।

"कल्योऽसि, भदन्त नागसेने"ति।

### (ग) किंलक्षणा संज्ञा

"भदन्त नागसेन, किंलक्षणा संज्ञे"ति ?

"संज्ञानलक्षणा, महाराज, संज्ञे"ति।

"किं संज्ञानमि"ति ?

"नीलमपि सञ्जानाति, पीतमपि सञ्जानाति, लोहितमपि सञ्जानाति, अवदातमपि सञ्जानाति, माञ्जिष्ठमपि संजानाति। एवमेव खलु, महाराज, संज्ञानलक्षणा संज्ञे"ति।

१–"औपम्यं कुर्वि"ति।

"यथा, महाराज, राज्ञो भाण्डागारिको भाण्डागारं प्रविश्य नीलपीतलोहितावदातमाञ्जिष्ठाणि राजभोग्याणि रूपाणि दृष्ट्वा सञ्जानाति, एवमेव खलु, महाराज, संज्ञानलक्षणा संज्ञे"ति।

"कल्योऽसि, भदन्त नागसेने"ति।

### (घ) किंलक्षणा चेतना

"भदन्त नागसेन, किंलक्षणा चेतने"ति ?

"चेतयितलक्षणा, महाराज, चेतना, अभिसंस्करणलक्षणा चे"ति।

१–"औपम्यं कुर्वि"ति।

"यथा, महाराज, कश्चिदेव पुरुषो विषमभिसंस्कृत्यात्मना च पिबेत्, परांश्च पाययेत्। स आत्मनाऽपि दुःखितो भवेत्,

परे'पि दुक्खिता भवेय्युं । एवमेव खो, महाराज, इधेकच्चो पुग्गलो अकुसलं कम्मं चेतनाय चेतयित्वा कायस्स भेदा परं मरणा अपायं दुग्गतिं विनिपातं निरयं उपपज्जेय्य । ये'पि तस्स अनुसिक्खन्ति, ते'पि कायस्स भेदा परं मरणा अपायं दुग्गतिं विनिपातं निरयं उपपज्जन्ति । यथा वा पन, महाराज, कोचिदेव पुरिसो सप्पि-नवनीत-तेल-मधु-फाणितं एकज्झं अभिसङ्खरित्वा अत्तना च पिवेय्य, परे च पायेय्य । सो अत्तना सुखितो भवेय्य, परे'पि सुखिता भवेय्युं । एवमेव खो, महाराज, इधेकच्चो पुग्गलो कुसलं कम्मं चेतनाय चेतयित्वा कायस्स भेदा परं मरणा सुगतिं सग्गं लोकं उपपज्जति । ये'पि तस्स अनुसिक्खन्ति, ते'पि कायस्स भेदा परं मरणा सुगतिं सग्गं लोकं उपपज्जन्ति । एवमेव, खलु महाराज, चेतयितलक्खणा चेतना, अभिसङ्खरणलक्खणा चा''ति ।

''कल्लो'सि, भन्ते नागसेना''ति ।

(ङ) किंलक्खणं विञ्ञाणं

''भन्ते नागसेन, किंलक्खणं विञ्ञाणं''ति ?

''विजाननलक्खणं, महाराज, विञ्ञाणं''ति ।

१–''ओपम्मं करोही''ति ।

''यथा, महाराज, नगरगुत्तिको मज्झे नगरसिङ्घाटके निसिन्नो पस्सेय्य पुरत्थिमदिसतो पुरिसं आगच्छन्तं, पस्सेय्य दक्खिणदिसतो पुरिसं आगच्छन्तं, पस्सेय्य पच्छिमदिसतो पुरिसं आगच्छन्तं, पस्सेय्य उत्तरदिसतो पुरिसं आगच्छन्तं । एवमेव खो, महाराज, यं च पुरिसो चक्खुना रूपं पस्सति तं विञ्ञाणेन विजानाति, यं च सोतेन सद्दं सुणाति तं विञ्ञाणेन विजानाति,

परेऽपि दुःखिता भवेयुः। एवमेव खलु, महाराज, इहैकको पुद्गलोऽकुशलं कर्म चेतनया चेतयित्वा कायस्य भेदात् परं मरणादपायं दुर्गति विनिपातं निरयमुपपद्येत। येऽपि तस्मादनुशिक्षन्ते तेऽपि कायस्य भेदात् परं मरणादपायं दुर्गति विनिपातं निरयमुपपद्यन्ते। यथा वा पुनर्महाराज, कश्चिदेव पुरुषः सर्पि-र्नवनीत-तैल-मधु-फाणितं एकत्र अभिसंस्कृत्य आत्मना च पिबेत्, परांश्च पाययेत्। स आत्मना सुखितो भवेत्, परेऽपि सुखिता भवेयुः। एवमेव खलु, महाराज, इहैकको पुद्गलः कुशलं कर्म चेतनया चेतयित्वा कायस्य भेदात् परं मरणात् सुगति स्वर्ग लोकमुपपद्येत। येऽपि तस्मादनुशिक्षन्ते तेऽपि कायस्य भेदात् परं मरणात् सुगति स्वर्ग लोकमुपपद्यन्ते। एवमेव खलु, महाराज, चेतयितलक्षणा चेतना, अभिसंस्करणलक्षणा चे"ति।

"कल्योऽसि, भदन्त नागसेने"ति।

### ( ङ ) किंलक्षणं विज्ञानम

"भदन्त नागसेन, किंलक्षणं विज्ञानमि"ति ?

"विज्ञानलक्षणं, महाराज, विज्ञानमि"ति।

१—"औपम्यं कुर्वि"ति।

"यथा, महाराज, नगरगोप्तृको मध्ये नगरशृङ्गाटके निषण्णः पश्येत् पूर्वदिशातः पुरुषमागच्छन्तम्, पश्येद् दक्षिणदिशातः पुरुषमागच्छन्तम् पश्येत् पश्चिमदिशातः पुरुषमागच्छन्तम्, पश्येदुत्तरदिशातः पुरुषमागच्छन्तम्। एवमेव खलु, महाराज, यच्च पुरुषश्चक्षुषा रूपं पश्यति तद् विज्ञानेन विजानाति, यच्च श्रोत्रेण शब्दं शृणोति तं विज्ञानेन विजानाति,

यं च घानेन गन्धं घायति तं विञ्ञाणेन विजानाति, यं च जिव्हाय रसं सायति तं विञ्ञाणेन विजानाति, यं च कायेन फोट्ठब्बं फुसति तं विञ्ञाणेन विजानाति, यं च मनसा धम्मं विजानाति तं विञ्ञाणेन विजानाति। एवं, खो, महाराज विजाननलक्खणं विञ्ञाणं''ति।

''कल्लो'सि, भन्ते, नागसेना''ति।

(च) किंलक्खणो वितक्को

''भन्ते नागसेन, किंलक्खणो वितक्को''ति ?

''अप्पनालक्खणो, महाराज, वितक्को''ति।

१–''ओपम्मं करोही''ति।

''यथा, महाराज, वड्ढकी सुपरिकम्मकतं दारुं सन्धिस्मि अप्पेति, एवमेव खो, महाराज, अप्पनालक्खणो वितक्को''ति।

''कल्लो'सि, भन्ते नागसेना''ति।

(छ) किंलक्खणो विचारो

''भन्ते नागसेन, किंलक्खणो विचारो''ति ?

''अनुमज्जनलक्खणो, महाराज, विचारो''ति।

१–''ओपम्मं करोही''ति।

''यथा, महाराज, कंसथालं आकोटितं पच्छा अनुरवति, अनुसद्दायति। यथा, महाराज, आकोटना एवं वितक्को दट्ठब्बो यथा अनुरवना, एवं विचारो''ति।

''कल्लो'सि, भन्ते नागसेना''ति।

ततिया वग्गो

## २६–चेतसिका धम्मा एकभावगता

राजा आह–''भन्ते नागसेन, सक्का इमेसं धम्मानं एकतो भावगतानं विनिब्भुजित्वा विनिब्भुजित्वा नानाकरणं पञ्ञापेतुं–

यं च घ्राणेन गन्धं जिघ्रति तं विज्ञानेन विजानाति, यश्च जिह्वया रसं स्वदते तं विज्ञानेन विजानाति, यं च कायेन स्पर्शं स्पृशति तं विज्ञानेन विजानाति, यं च मनसा धर्मं विजानाति तं विज्ञानेन विजानाति । एवं खलु, महाराज, विज्ञानलक्षणं विज्ञानमि"ति ।

"कल्योऽसि, भदन्त नागसेने"ति ।

( च ) किंलक्षणो वितर्कः

"भदन्त नागसेन, किंलक्षणो वितर्क"इति ?

"अर्पणालक्षणो, महाराज, वितर्क"इति ।

१–"औपम्यं कुर्वि"ति ।

"यथा, महाराज, वर्धकी सुपरिकर्मकृतं दारुं सन्धावर्पयति, एवमेव खलु, महाराज, अर्पणालक्षणो वितर्क"इति ।

"कल्योऽसि, भदन्त नागसेने"ति ।

( छ ) किंलक्षणो विचारः

"भदन्त नागसेन, किंलक्षणो विचार"इति ?

"अनुमार्जनलक्षणो, महाराज, विचार"इति ।

१–"औपम्यं कुर्वि"ति ।

"यथा, महाराज, कांस्यस्थालमाकोटितं पश्चादनुरवति, अनुशब्दायते । यथा, महाराज, आकोटना एवं वितर्को द्रष्टव्यः, यथाऽनुरवणा, एवं विचारो द्रष्टव्य"इति ।

"कल्योऽसि, भदन्त नागसेने"ति ।

तृतीयो वर्गः

२६—चैतसिका धर्मा एकभावगता

राजाऽऽह—"भदन्त नागसेन, शक्यमेषा धर्माणामेकतो भावगतानां विनिर्भज्य विनिर्भज्य नानाकरणं प्रज्ञापयितुम्—

'अयं फस्सो, अयं वेदना, अयं सञ्ञा, अयं चेतना, इदं विञ्ञाणं, अयं वितक्को, अयं विचारो''ति ?

"न सक्का, महाराज, इमेसं धम्मानं एकतो भावगतानं विनिब्भुजित्वा विनिब्भुजित्वा नानाकरणं पञ्ञापेतुं—'अयं फस्सो, अयं वेदना, अयं सञ्ञा, अयं चेतना, इदं विञ्ञाणं, अयं वितक्को, अयं विचारो''ति ।

१—"ओपम्मं करोही''ति ।

"यथा, महाराज, रञ्ञो सूदो अग्गं वा रसं वा करेय्य । सो तत्थ दधि पि पक्खिपेय्य, लोणं पि पक्खिपेय्य, सिङ्गिवेरं पि पक्खिपेय्य, जीरकं पि पक्खिपेय्य, मरिचं पि पक्खिपेय्य, अञ्ञानि पि पकारानि पक्खिपेय्य, तमेनं राजा एवं वदेय्य—'दधिस्स मे रसं आहर, लोणस्स मे रसं आहर, सिङ्गिवेरस्स रसं आहर, जीरकस्स मे रसं आहर, मरिचस्स मे रसं आहर, सब्बेसं मे पक्खित्तानं रसं आहरा'ति । सक्का नु खो, महाराज, तेसं रसानं एकतो भावगतानं विनिब्भुजित्वा विनिब्भुजित्वा रसं आहरितुं—अम्बिलत्तं वा लवणत्तं वा तित्तकत्तं वा कटुकत्तं वा कसायत्तं वा मधुरत्तं वा''ति ?

"न हि, भन्ते, सक्का तेसं रसानं एकतो भावगतानं विनिब्भुजित्वा विनिब्भुजित्वा रसं आहरितुं-अम्बिलत्तं वा लवणत्तं वा, तित्तकत्तं वा, कटुकत्तं वा, कसायत्तं वा, मधुरत्तं वा । अपि च खो पन सकेन सकेन लक्खणेन उपट्ठहन्ती''ति ।

"एवमेव खो, महाराज, न सक्का इमेसं धम्मानं एकतो भावगतानं विनिब्भुजित्वा विनिब्भुजित्वा नानाकरणं पञ्ञापेतुं—'अयं फस्सो, अयं वेदना, अयं सञ्ञा, अयं चेतना, इदं विञ्ञाणं,

अयं स्पर्शः, इयं वेदना, इयं संज्ञा, इयं चेतना, इदं विज्ञानं, अयं वितर्कः, अयं विचार"इति ?

"न शक्यं, महाराज, एषां धर्माणामेकतो भावगतानां विनिर्भज्य विनिर्भज्य नानाकरणं प्रज्ञापयितुम्—अयं स्पर्शः, इयं वेदना, इयं संज्ञा, इयं चेतना, इदं विज्ञानं, अयं वितर्कः, अयं विचार"इति।

?—"औपम्यं कुर्वि"ति।

"यथा, महाराज, राज्ञः सूदो रसं वा रसं वा कुर्यात्। स तत्र दध्यपि प्रक्षिपेत्, लवणमपि प्रक्षिपेत्, शृङ्गिवेरमपि प्रक्षिपेत्, जीरकमपि प्रक्षिपेत्, मरिचमपि प्रक्षिपेत्, अन्यानपि प्रकारान् प्रक्षिपेत्। तमेनं राजा एवं वदेत्—दध्नो मे रसमाहर, लवणस्य मे रसमाहर, शृङ्गिवेरस्य मे रसमाहर, जीरकस्य मे रसमाहर, मरिचस्य मे रसमाहर, सर्वेषां मे प्रक्षिप्तानां रसमाहरेति। शक्यं नु खलु, महाराज, तेषां रसानामेकतो भावगतानां विनिर्भज्य विनिर्भज्य रसमाहर्तुम्—अम्लत्वं वा, लवणत्वं वा, तिक्तकत्वं वा कटुकत्वं वा कषायत्वं वा मधुरत्वं वे"ति ?

"न हि, भदन्त, शक्यं तेषां रसानामेकतो भावगतानां विनिर्भज्य विनिर्भज्य रसमाहर्तुम्—अम्लत्वं वा लवणत्वं वा तिक्तकत्वं वा कटुकत्वं वा, कषायकत्वं वा, मधुरत्वं वा। अपि च खलु पुनः स्वकेन स्वकेन लक्षणेनोपतिष्ठन्ती"ति।

"एवमेव खलु, महाराज, न शक्यमेषां धर्माणामेकतो भावगतानां विनिर्भज्य विनिर्भज्य नानाकरणं प्रज्ञापयितुम्—'अयं स्पर्शः, इयं वेदना, इयं संज्ञा इयं चेतना इदं विज्ञानं

'अयं वितक्को, अयं विचारो'ति । अपि च खो पन सकेन सकेन लक्खणेन उपट्ठहन्ती''ति ।

''कल्लो'सि, भन्ते नागसेना''ति ।

थेरो आह––लोणं, महाराज, चक्खुविञ्ञेय्यं''ति ?

''आम, भन्ते, चक्खुविञ्ञेय्यं''ति ।

''सुट्ठु खो, महाराज, जानाही''ति ।

''किं पन, भन्ते, जिव्हाविञ्ञेय्यं''ति ?

''आम, महाराज, जिव्हाविञ्ञेय्यं''ति ।

''किं पन, भन्ते, सब्बं लोणं जिव्हाय विजानाती''ति ?

''आम, महाराज, सब्बं लोणं जिव्हाय विजाना''ति ।

''यदि, भन्ते, सब्बं लोणं जिव्हाय विजानाति, किस्स पन तं सकटेहि बलीबद्दा आहरन्ति ? ननु लोणमे'व आहरितब्बं''ति ?

''न सक्का, महाराज, लोणमे'व आहरितुं । एकतो भावगता एते धम्मा गोचरनानत्तगता लोणं गरुभावो चा''ति ।

''सक्का पन, महाराज, लोणं तुलाय तुलयितुं''ति ?

''आम, भन्ते, सक्का''ति ।

''न सक्का, महाराज, लोणं तुलाय तुलयितुं, गरुभावो तुलाय तुलियती''ति ।

''कल्लो'सि, भन्ते नागसेना''ति ।

नागसेनमिलिन्दराजपञ्हा निट्ठिता ।

अयं वितर्कः, अयं विचार' इति । अपि च खलु पुनः स्वकेन स्वकेन लक्षणेनोपतिष्ठन्ती''ति ।

''कल्योऽसि, भदन्त नागसेने''ति ।

स्थविर आह—''लवणं, महाराज, चक्षुर्विज्ञेयमि''ति ?

''आम्, भदन्त, चक्षुर्विज्ञेयमि''ति ।

''सुष्ठु खलु, महाराज, जानीही''ति ।

''किम्पुनर्भदन्त, जिह्वाविज्ञेयमि''ति ?

''आम्, महाराज, जिह्वाविज्ञेयमि'ति ।

''किम्पुनर्भदन्त, सर्वं लवणं जिह्वया विजानाती''ति ?

''आम, महाराज, सर्वं लवणं जिह्वया विजानाती''ति ।

''यदि, भदन्त सर्वं लवणं जिह्वया विजानाति, कस्मात् पुनस्तच्छकटैर्बलीवर्दा आहरन्ति ? ननु लवणमेवाहर्तव्यमि''ति?

''न शक्यं, महाराज, लवणमेवाहर्तुम । एकतो भावगता एते धर्मा गोचरनानात्वगता लवणं गुरुभावश्चे''ति ।

''शक्यं पुनर्महाराज, लवणं तुलाया तुलयितुमि''ति ?

''आम् भदन्त, शक्यमि''ति ।

''न शक्यं, महाराज, लवणं तुलायां तुलयितुं, गुरुभावस्तुलायां तोल्यत''इति ।

''कल्योऽसि, भदन्त नागसेने''ति ।

नागसेनमिलिन्दराजप्रश्ना निष्ठिताः ।

———

# ततियो परिच्छेदो

## ( ख ) विमतिच्छेदनपञ्हो

### १—पञ्चायतनानि नानाकम्मनिब्बत्तानि

राजा आह—"भन्ते नागसेन, यानि'मानि पञ्चायतनानि, किं नु तानि नानाकम्मेहि निब्बत्तानि, उदाहु एकेन कम्मेना"ति ?

"नानाकम्मेहि, महाराज, निब्बत्तानि, न एकेन कम्मेना"ति ।

१—"ओपम्मं करोही"ति ।

"तं किं मञ्ञसि, महाराज, एकस्मिं खेत्ते नानाबीजानि वप्पेय्युं, तेसं नानाबीजानं नानाफलानि निब्बत्तेय्युं"ति ?

"आम, भन्ते, निब्बत्तेय्युं"ति ।

"एवमेव खो, महाराज, यानि यानि पञ्चायतनानि तानि तानि नानाकम्मेहि निब्बत्तानि, न एकेन कम्मेना"ति ।

"कल्लो'सि, भन्ते नागसेना"ति ।

### २—कम्मस्सका सत्ता

राजा आह—"भन्ते नागसेन, केन कारणेन मनुस्सा न सब्बे समका । अञ्ञे अप्पायुका, अञ्ञे दीघायुका, अञ्ञे बव्हाबाधा, अञ्ञे अप्पाबाधा, अञ्ञे दुब्बण्णा, अञ्ञे वण्णवन्तो, अञ्ञे अप्पेसक्खा, अञ्ञे महेसक्खा, अञ्ञे अप्पभोगा, अञ्ञे महाभोगा, अञ्ञे नीचकुलीना, अञ्ञे महाकुलीना, अञ्ञे दुप्पञ्ञा, अञ्ञे पञ्ञवन्तो"ति ?

थेरो आह—'कस्स पुन, महाराज, रुक्खा न सब्बे समका । अञ्ञे अम्बिला, अञ्ञे लवणा, अञ्ञे तित्तका, अञ्ञे कटुका, अञ्ञे कसावा, अञ्ञे मधुरा"ति ?

# तृतीयः परिच्छेदः

## (ख) विमतिच्छेदनप्रश्नः

### १—पञ्चायतनानि नानाकर्मनिर्वृत्तानि

राजाऽऽह—"भदन्त नागसेन, यानीमानि पञ्चायतनानि, किन्नु तानि नानाकर्मभिर्निवृत्तानि, उताहो एकेन कर्मणे"ति ?

"नानाकर्मभिर्महाराज, निर्वृत्तानि, नैकेन कर्मणे"ति ।

१—"औपम्यं कुर्वि"नि ।

"तत् किं मन्यसे, महाराज, एकस्मिन् क्षेत्रे नानाबीजान्युप्येरन्, तेषां नानाबीजानां नानाफलानि निर्वर्तेरन्नि"ति ?

"आम्, भदन्त, निर्वर्तेरन्नि"ति ।

"एवमेव खलु, महाराज, यानि यानि पञ्चायतनानि तानि तानि नानाकर्मभिर्निर्वृत्तानि, नैकेन कर्मणे"ति ।

"कल्योऽसि, भदन्त नागसेने"ति ।

### २—कर्मस्वकाः सत्वाः

राजाऽऽह—"भदन्त नागसेन, केन कारणेन मनुष्या न सर्वे समकाः । अन्येऽल्पायुष्काः, अन्ये दीर्घायुष्काः, अन्ये बह्वाबाधाः अन्येऽल्पाबाधाः, अन्ये दुर्वर्णाः, अन्ये वर्णवन्तः, अन्येऽल्पशक्ताः, अन्ये महाशक्ताः, अन्येऽल्पभोगाः, अन्ये महाभोगाः, अन्ये नीचकुलीनाः, अन्ये महाकुलीनाः, अन्ये दुष्प्रज्ञाः, अन्ये प्रज्ञावन्त"इति ?

स्थविर आह—"कस्मात् पुनर्महाराज, वृक्षा न सर्वे समकाः । अन्येऽम्लाः, अन्ये लवणाः, अन्ये तिक्तकाः, अन्ये कटुकाः, अन्ये कषायाः, अन्ये मधुरा"इति ?

"मञ्ञामि, भन्ते, बीजानं नानाकरणेना"ति ।

"एवमेव खो, महाराज, कम्मानं नानाकरणेन मनुस्सा न सब्बे समका । अञ्ञे अप्पायुका, अञ्ञे दीघायुका, अञ्ञे बव्हाबाधा, अञ्ञे अप्पाबाधा, अञ्ञे दुब्बण्णा, अञ्ञे वण्णवन्तो, अञ्ञे अप्पेसक्खा, अञ्ञे महेसक्खा, अञ्ञे अप्पभोगा, अञ्ञे महाभोगा, अञ्ञे नीचकुलीना, अञ्ञे महाकुलीना, अञ्ञे दुप्पञ्ञा, अञ्ञे पञ्ञवन्तो । भासितं पे'तं, महाराज, भगवता—'कम्मस्सका, माणव, सत्ता, कम्मदायादा, कम्मयोनी, कम्मबन्धू, कम्मपटिसरणा । कम्मं सत्ते विभजति, यदि'दं हीनप्पणीतताया"ति ।

"कल्लो'सि, भन्ते नागसेना"ति ।

### ३—अकिच्चकरो किच्चकरो च वायामो

राजा आह—"भन्ते नागसेन, तुम्हे भणथ—'किं'ति इमं दुक्खं निरुज्झेय्य, अञ्ञञ्च दुक्खं नुप्पज्जेय्या'"ति ।

"एतदत्था, महाराज, अम्हाकं पब्बज्जा"ति ।

"किं पटिगच्चेव वायमितेन ! ननु सम्पत्ते काले वायमितब्बं"ति ? थेरो आह—"सम्पत्ते काले, महाराज, वायायो अकिच्चकरो भवति । पटिगच्चेव वायामो किच्चकरो भवती"ति ।

१—"ओपम्मं करोही"ति ।

"तं किं मञ्ञसि, महाराज, यदा त्वं पिपासितो भवेय्या'सि तदा त्वं उदपानं खणापेय्यासि, तळाकं खणापेय्यासि, पानीयं पिविस्सामी"ति?

"न हि, भन्ते"ति ।

"एवमेव खो, महाराज, सम्पत्ते काले वायामो अकिच्चकरो भवति, पटिगच्चेव वायामो किच्चकरो भवती"ति ।

२—"भिय्यो ओपम्मं करोही"ति ।

"मन्ये, भदन्त, बीजानां नानाकरणेने''ति ।

"एवमेव खलु, महाराज, कर्मणां नानाकरणेन मनुष्या न सर्वे समकाः । अन्येऽल्पायुष्काः, अन्ये दीर्घायुष्काः, अन्ये बह्वाबाधाः, अन्येऽल्पाबाधाः, अन्ये दुर्वणाः, अन्ये वर्णवन्तः, अन्येऽल्पशक्ताः, अन्ये महाशक्ताः, अन्येऽल्पभोगाः, अन्ये महाभोगाः अन्ये नीचकुलीनाः, अन्ये महाकुलीनाः, अन्ये दुष्प्रज्ञाः, अन्ये प्रज्ञावन्तः । भाषितमप्येतन्महाराज, भगवता– 'कर्मस्वकाः, माणव, सत्वाः कर्मदायादाः कर्मयोनयः कर्मबन्धवः, कर्मप्रतिसरणाः। कर्म सत्वान् विभजति, यदिदं हीनप्रणीततायामि''ति।

"कल्योऽसि, भदन्त नागसेने''ति ।

३–अकिञ्चित्करः किञ्चित्करश्च व्यायामः

राजाऽऽह–"भदन्त नागसेन, यूयं भणथ–'किमिति इदं दुःखं निरुन्ध्यात्, अन्यच्च दुःखं नोत्पद्येते'''ति ।

"एतदर्था, महाराज, अस्माकं प्रव्रज्या''ति ।

"किं प्रतिगत्यैव व्यायमितेन ! ननु सम्प्राप्ते काले व्यायमितव्यमि''ति?स्थविर आह–"सम्प्राप्ते काले, महाराज, व्यायामोऽकिञ्चित्करो भवति । प्रतिगत्यैव व्यायामः किञ्चित्करो भवती''ति ।

१–"औपम्यं कुर्वि''ति ।

"तत्किं मन्यसे, महाराज, यदा त्वं पिपासितो भवेस्तदा त्वमुदपानं खानयेः, तडागं खानयेः, पानीयं पास्यामी''ति ?

"न हि, भदन्ते''ति ।

"एवमेव खलु, महाराज, सम्प्राप्ते काले व्यायामोऽकिञ्चित्करो भवति, प्रतिगत्यैव व्यायामः किञ्चित्करो भवती''ति ।

२–"भूय औपम्यं कुर्वि''ति ।

"तं कि मञ्ञसि, महाराज, यदा त्वं बुभुक्खितो भवेय्यासि तदा त्वं खेत्तं कस्सापेय्यासि, सालिं रोपापेय्यासि, धञ्ञं अतिहरापेय्यासि, भत्तं भुञ्जिस्सामो"ति ?

"न हि, भन्ते"ति ।

"एवमेव खो, महाराज, सम्पत्तेकाले वायामो अकिच्चकरो भवति, पटिगच्चेव वायामो किच्चकरो भवती"ति ।

३–भिय्यो ओपम्मं करोही"ति ।

"तं किं मञ्ञसि, महाराज, यदा ते सङ्गामो पच्चुपट्ठितो भवेय्य, तदा त्वं परिखं खणापेय्यासि, पाकारं कारापेय्यासि, गोपुरं कारापेय्यासि, अट्टालकं कारापेय्यासि, धञ्ञं अतिहरापेय्यासि, तदा त्वं हत्थिस्मिं सिक्खेय्यासि, अस्सस्मिं सिक्खेय्यासि, रथस्मिं सिक्खेय्यासि, धनुस्मिं सिक्खेय्यासि, थरुस्मिं सिक्खेय्यासी"ति ?

"न हि, भन्ते"ति ।

"एवमे'व खो, महाराज, सम्पत्ते काले वायामो अकिच्चकरो भवति, पटिगच्चेव वायामो किच्चकरो भवति। भासितं पे'तं, महाराज, भगवता––

'पटिगच्चेव तं कयिरा यं जञ्ञा हितमत्तनो ।
न साकटिकचिन्ताय मन्ताधीरो परक्कमे ॥
'यथा साकटिको मट्ठं समं हित्वा महापथं ।
विसमं मग्गमारुय्ह अक्खच्छिन्नो व झायति ॥
'एवं धम्मा अपक्कम्म अधम्मम'नुवत्तिय ।
मन्दो मच्चुमुखं पत्तो अक्खच्छिन्नो व झायती''ति ॥

"कल्लो'सि, भन्ते नागसेना"ति ।

"तत्किं मन्यसे, महाराज, यदा त्वं बुभुक्षितो भवेस्तदा त्वं क्षेत्रं कर्षये:, शालि रोपये, धान्यमतिहारये:, भक्तं भोक्ष्यामी"ति ?

"न हि, भदन्ते"ति।

"एवमेव खलु, महाराज, सम्प्राप्ते काले व्यायामोऽकिञ्चित्करो भवति, प्रतिगत्यैव व्यायामः किञ्चित्करो भवती"ति।

३—"भूय औपम्यं कुर्वि"ति।

"तत्किं मन्यसे, महाराज, यदा ते सङ्ग्रामः प्रत्युपस्थितो भवेत्, तदा त्वं परिखां खानये:, प्राकारं कारये:, गोपुरं कारये:, अट्टालकं कारये:, धान्यमतिहारये:, तदा त्वं हस्तिनि शिक्षेथा:, अश्वे शिक्षेथा:, रथे शिक्षेथा:, धनुषि शिक्षेक्षा:, त्सरौ शिक्षेथा"इति ?

"न हि, भदन्ते"ति।

"एवमेव खलु, महाराज, सम्प्राप्ते काले व्यायामोऽकिञ्चित्करो भवति, प्रतिगत्यैव व्यायामः किञ्चित्करो भवति। भाषितमप्येतन्महाराज, भगवता—

'प्रतिगत्यैव तत्कुर्याद् यज्जानीयाद् हितमात्मनः।
न शाकटिकचिन्तायां मन्ताऽधीरः पराक्रमे॥
'यथा शाकटिको मृष्टं समं हित्वा महापथम्।
विषमं मार्गमारुह्याक्षच्छिन्न इव ध्यायति॥
'एवं धर्मानपक्रम्याधर्ममनुवृत्य (च)।
मन्दो मृत्युमुखं प्राप्तोऽक्षच्छिन्न इव ध्यायती'"ति॥

"कल्योऽसि, भदन्त नागसेने"ति।

## ४—नेरयिको अग्गि

राजा आह—"भन्ते नागसेन, तुम्हे भणथ—'पाकतिकअग्गितो नेरयिको अग्गि महा'भितापतरो होति। खुद्दको'पि पासाणो पाकतिके अग्गिम्हि पक्खित्तो दिवसं पि पच्चमानो न विलयं गच्छति, कूटागारमत्तो'पि पासाणो नेरयिकग्गिम्हि पक्खित्तो खणेन विलयं गच्छती'ति। एतं वचनं न सद्दहामि। एवं च पन वदेथ—'ये च तत्थ उप्पन्ना सत्ता ते अनेकानि पि वस्ससहस्सानि निरये पच्चमाना न विलयं गच्छन्ती'ति। तं पि वचनं न सद्दहामी"ति। थेरो आह—"तं किं मञ्ञसि, महाराज, या ता सन्ति मकरिनियो'पि सुंसुमारिनियो'पि कच्छपिनियो'पि मोरिनियो'पि कपोतिनियो'पि, किं नु ता कक्खळानि पासाणानि सक्खरायो च खादन्ती"ति ?

"आम, भन्ते, खादन्ती"ति।

"किं पन तानि तासं कुच्छियं कोट्ठब्भन्तरगतानि विलयं गच्छन्ती"ति ?

"आम, भन्ते, विलयं गच्छन्ती"ति।

"यो पन तासं कुच्छियं गब्भो सो'पि विलयं गच्छती"ति ?

"न हि, भन्ते"ति।

"केन कारणेना"ति ?

"मञ्ञामि, भन्ते, कम्माधिकतेन न विलयं गच्छती"ति।

"एवमेव खो, महाराज, कम्माधिकतेन नेरयिका सत्ता अनेकानि पि वस्ससहस्सानि निरये पच्चमाना न विलयं गच्छन्ति। भासितं पेतं, महाराज, भगवता—'सो न ताव कालं करोति, याव तं न पापकम्मं ब्यन्तीहोती'"ति।

### ४—नैरयिकोऽग्निः

राजाऽऽह—"भदन्त नागसेन, यूयं भणथ—'प्राकृतिकाग्नितो नैरयिकोऽग्निर्महाभितापतरो भवति । क्षुद्रकोऽपि पाषाणः प्राकृतिकेऽग्नौ प्रक्षिप्तो दिवसमपि पच्यमानो न विलयं गच्छति, कूटागारमात्रोऽपि पाषाणो नैरयिकाग्नौ प्रक्षिप्तः क्षणेन विलयं गच्छती'ति । एतद् वचनं न श्रद्दधामि । एवं च पुनर्वदथ—'ये च तत्रोत्पन्नाः सत्त्वास्तेऽनेकान्यपि वर्षसहस्राणि निरये पच्यमाना न विलयं गच्छन्ती'ति । तदपि वचनं न श्रद्दधामी"ति । स्थविर आह—"तत्किं मन्यसे, महाराज, यास्ताः सन्ति मकर्योऽपि सुंसुमार्योऽपि कच्छप्योऽपि मयूर्योऽपि कपोत्योऽपि, किन्तु ताः कङ्कणानि पाषाणान् शर्कराश्च खादन्ती"ति ?

"आम्, भदन्त, खादन्ती"ति ।

"किम्पुनस्तानि तासां कुक्षौ कोष्ठाभ्यन्तरगतानि विलयं गच्छन्ती"ति ?

"आम्, भदन्त, विलयं गच्छन्ती"ति ।

"यः पुनस्तासां कुक्षौ गर्भः सोऽपि विलयं गच्छती"ति ?

"न हि, भदन्ते"ति ।

"केन कारणेने"ति ?

"मन्ये, भदन्त, कर्माधिकृतेन न विलयं गच्छती"ति ।

"एवमेव खलु, महाराज, कर्माधिकृतेन नैरयिकाः सत्त्वा अनेकान्यपि वर्षसहस्राणि निरये पच्यमाना न विलयं गच्छन्ति । भाषितमप्येतद्, महाराज, भगवता—'स न तावत् कालं करोति, यावत्तन्न पापकर्म व्यन्तीभवती'"ति ।

२–"भिय्यो ओपम्मं करोही"ति।

"तं किं मञ्ञसि, महाराज, या ता सन्ति सीहिनियो'पि ब्यग्घिनियो'पि,दीपिनियोपि कुक्कुरिनियो'पि किं नु ता कक्खळानि अट्ठिकानि मंसानि खादन्ती"ति ?

"आम, भन्ते, खादन्ती"ति।

"किं पन तानि तासं कुच्छियं कोट्ठब्भन्तरगतानि विलयं गच्छन्ती"ति ?

"आम, भन्ते, विलयं गच्छन्ती"ति।

"यो पन तासं कुच्छियं गब्भो सो'पि विलयं गच्छती"ति ?

"न हि, भन्ते"ति।

"केन कारणेना"ति ?

"मञ्ञामि, भन्ते, कम्माधिकतेन न विलयं गच्छती"ति।

"एवमेव खो, महाराज, कम्माधिकतेन नेरयिका सत्ता अनेकानि पि वस्ससहस्सानि निरये पच्चमाना न विलयं गच्छन्ती"ति।

३–"भिय्यो ओपम्मं करोही"ति।

"तं किं मञ्ञसि,महाराज,या ता सन्ति योनकसुखुमालिनियो'पि खत्तियसुखुमालिनियो'पि ब्राह्मणसुखुमालिनियो'पि गहपतिसुखुमालिनियो'पि, किं नु ता कक्खळानि खज्जकानि मंसानि खादन्ती"ति ?

"आम, भन्ते, खादन्ती"ति।

"किं पन तानि तासं कुच्छियं कोट्ठब्भन्तरगतानि विलयं गच्छन्ती"ति ?

"आम, भन्ते, विलयं गच्छन्ती"ति।

"यो पन तासं कुच्छियं गब्भो सो'पि विलयं गच्छती"ति।

"न हि, भन्ते"ति।

२—"भूय औपम्यं कुर्वि"ति।

"तत्किं मन्यसे, महाराज, यास्ताः सन्ति सिंह्योऽपि, व्याघ्र्योऽपि द्वीपिन्योऽपि कुक्कुर्योऽपि किन्नु ताः कङ्कणानि अस्थिकानि मांसानि खादन्ती"ति ?

"आम्, भदन्त, खादन्ती"ति।

"किम्पुनस्तानि तासां कुक्षौ कोष्ठाभ्यन्तरगतानि विलयं गच्छन्ती"ति ?

"आम्, भदन्त, विलयं गच्छन्ती"ति।

"यः पुनस्तासां कुक्षौ गर्भः सोऽपि विलयं गच्छती"ति ?

"न हि, भदन्ते"ति।

"केन कारणेने"ति ?

"मन्ये, भदन्त, कर्माधिकृतेन न विलयं गच्छन्ती"ति।

"एवमेव खलु, महाराज, कर्माधिकत्वेन नैरयिकाः सत्त्वा अनेकान्यपि वर्षसहस्राणि निरये पच्यमाना न विलयं गच्छन्ती"ति।

३—"भूय औपम्यं कुर्वि"ति।

"तत्किं मन्यसे, महाराज, यास्ताः सन्ति यवनकसुकुमार्योऽपि क्षत्रियसुकुमार्योऽपि ब्राह्मणसुकुमार्योऽपि गृहपतिसुकुमार्योऽपि, किन्नु ताः कङ्कणानि खर्जकाणि मांसानि खादन्ती"ति ?

"आम्, भदन्त, खादन्ती"ति।

"किम्पुनस्तानि तासां कुक्षौ कोष्ठाभ्यन्तरगतानि विलयं गच्छन्ती"ति ?

"आम्, भदन्त, विलयं गच्छन्ती"ति।

"यः पुनस्तासां कुक्षौ गर्भः सोऽपि विलयं गच्छती"ति ?

"न हि, भदन्ते"ति।

"केन कारणेना"ति ?

"मञ्ञामि, भन्ते, कम्माधिकतेन न विलयं गच्छती"ति ।

"एवमेव खो, महाराज, कम्माधिकतेन नेरयिका सत्ता अनेकानि'पि वस्ससहस्सानि निरये पच्चमाना न विलयं गच्छन्ति। भासितं पे'तं, महाराज, भगवता—'सो न ताव कालङ्करोति, याव न तं पापं कम्मं ब्यन्तीहोती"ति ।

"कल्लो'सि, भन्ते, नागसेना"ति ।

### ५—महापथवी कत्थ पतिट्ठिता

राजा आह—"भन्ते नागसेन, तुम्हे भणथ—'अयं महापथवी उदके पतिट्ठिता, उदकं वाते पतिट्ठितं, वातो आकासे पतिट्ठितो'ति, एतं पि वचनं न सद्दहामो"ति । थेरो धम्मकरकेन उदकं गहेत्वा राजानं मिलिन्दं सञ्ञापेसि—"यथा, महाराज, इमं उदकं वातेन आधारितं । एवं तं पि उदकं वातेन आधारितं"ति ।

"कल्लो'सि, भन्ते नागसेना"ति ।

### ६—निरोधो निब्बानं

राजा आह—"भन्ते नागसेन, निरोधो निब्बानं"ति ?

"आम, महाराज, निरोधो निब्बानं"ति ।

"कथं, भन्ते नागसेन, निरोधो निब्बानं"ति ?

"सब्बे बालपुथुज्जना खो, महाराज, अज्झत्तिकबाहिरे आयतने अभिनन्दन्ति, अभिवदन्ति, अज्झोसाय तिट्ठन्ति, ते तेन सोतेन वुय्हन्ति, न परिमुच्चन्ति जातिया जराय मरणेन सोकेन परिदेवेन दुक्खेहि दोमनसेहि उपायासेहि । न परिमुच्चन्ति दुक्खस्मा'ति वदामि । सुतवा च खो, महाराज, अरियसावको अज्झ-

"केन कारणेने"ति ?

"मन्ये, भदन्त कर्माधिकृतेन न विलयं गच्छती"ति ।

"एवमेव खलु, महाराज, कर्माधिकृतेन नैरयिकाः सत्त्वा अनेकान्यपि वर्षसहस्राणि निरये पच्यमाना न विलयं गच्छन्ति । भाषितमप्येतन्महाराज, भगवता—'स न तावत् कालङ्करोति, यावन्न तत् पापकर्म व्यन्तीभवती"ति ।

"कल्योऽसि, भदन्त नागसेने"ति ।

### ५—महापृथिवी कुत्र प्रतिष्ठिता

राजाऽऽह—"भदन्त नागसेन, यूयं भणथ—'इयं महापृथिवी उदके प्रतिष्ठिता, उदकं वाते प्रतिष्ठितं, वात आकाशे प्रतिष्ठित'इति, एतदपि वचनं न श्रद्दधामी"ति । स्थविरो धर्मकरकेणोदकं गृहीत्वा राजानं मिलिन्दं समजिज्ञपत्—"यथा, महाराज, इदमुदकं वातेनाधारितम् । एवं तदप्युदकं वातेनाधारितमि"ति ।

"कल्योऽसि, भदन्त नागसेने"ति ।

### ६—निरोधो निर्वाणम्

राजाऽऽह—"भदन्त नागसेन, निरोधो निर्वाणमि"ति ?

"आम्, महाराज, निरोधो निर्वाणमि"ति ।

"कथं, भदन्त नागसेन, निरोधो निर्वाणमि"ति ?

"सर्वे बालपृथग्जनाः खलु, महाराज, आध्यात्मिकबाह्यान्यायतनान्यभिनन्दन्ति, अभिवदन्ति, अध्यवसाय तिष्ठन्ति, ते तेन स्रोतसा उह्यन्ते न परिमुच्यन्ते जात्या जरया मरणेन शोकेन परिदेवेन दुःखैर्दौर्मनस्यैरुपायासैः । न परिमुच्यन्ते दुःखादिति वदामि । श्रुतवांश्च खलु, महाराज, आर्यश्रावक आध्या-

त्तिकबाहिरे आयतने नाभिनन्दति नाभिवदति नाज्झोसाय तिट्ठति। तस्स तं अनभिनन्दतो अनभिवदतो अनज्झोसाय तिट्ठतो तण्हा निरुज्झति, तण्हानिरोधा उपादाननिरोधो, उपादाननिरोधा भवनिरोधो, भवनिरोधा जातिनिरोधो, जातिनिरोधा जरामरणसोकपरिदेवदुक्खदोमनस्सु'पायासा निरुज्झन्ति। एवमे'तस्स केवलस्स दुक्खक्खन्धस्स निरोधो होति। एवं खो, महाराज, निरोधो निब्बानं''ति।

''कल्लो'सि, भन्ते नागसेनो''ति।

### ७—के लभन्ति निब्बानं

राजा आह—''भन्ते नागसेन, सब्बे'व लभन्ति निब्बानं''ति?

''न खो, महाराज, सब्बेव लभन्ति निब्बानं ति; अपि च खो, महाराज, यो सम्मा पटिपन्नो अभिञ्ञेय्ये धम्मे अभिजानाति, परिञ्ञेय्ये धम्मे परिजानाति, पहातब्बे धम्मे पजहति, भावेतब्बे धम्मे भावेति, सच्छिकातब्बे धम्मे सच्छिकरोति, सो लभति निब्बानं''ति।

''कल्लो'सि, भन्ते नागसेना'ति।

### ८—निब्बानं परमं सुखं

राजा आह—''भन्ते नागसेन, यो न लभति निब्बानं जानाति सो—'सुखं निब्बानं'''ति?

''आम, महाराज, यो न लभति निब्बानं जानाति सो—'सुखं निब्बानं'''ति।

''कथं, भन्ते नागसेन, अलभन्तो जानाति—'सुखं निब्बानं'''ति?

तिमकबाह्यान्यायतनानि नाभिनन्दति, नाभिवदति, नाध्यवसाय तिष्ठति । तस्य तदनभिनन्दतोऽनभिवदतोऽनध्यवसाय तिष्ठतस्तृष्णा निरुध्यते, तृष्णानिरोधादुपादाननिरोधः, उपादाननिरोधाद् भवनिरोधः, भवनिरोधाज्जातिनिरोधः, जातिनिरोधाज्जरामरणशोकपरिदेवदुक्खदौर्मनस्योपासा निरुध्यन्ते । एवमेतस्य केवलस्य दुःखस्कन्धस्य निरोधो भवति । एवं खलु महाराज, निरोधो निर्वाणमि''ति ।

''कल्योऽसि, भदन्त नागसेने''ति ।

## ७ के लभन्ते निर्वाणम्

राजाऽऽह––''भदन्त नागसेन, सर्व एव लभन्ते निर्वाणमि''ति ?

''न खलु, महाराज, सर्व एव लभन्ते निर्वाणमिति, अपि च खलु, महाराज, यः सम्यक्प्रतिपन्नोऽभिज्ञेयान् धर्मानभिजानाति, परिज्ञेयान् धर्मान् परिजानाति, प्रहातव्यान् धर्मान् प्रजहाति भावयितव्यान् धर्मान् भावयति, साक्षात्कर्तव्यान् धर्मान् साक्षात्करोति, स लभते निर्वाणमि''ति ।

''कल्योऽसि, भदन्त नागसेने''ति ।

## ८—निर्वाणं परमं सुखम्

राजाऽऽह–''भदन्त नागसेन, यो न लभते निर्वाणं, जानाति सः–'सुखं निर्वाणमि'''ति ?

''आम्, महाराज, यो न लभते निर्वाणं, जानाति सः–'सुखं निर्वाणमि' 'ति ।

'कथं, भदन्त नागसेन, अलभमानो जानाति– 'सुखं निर्वाणमि'''ति ?

"तं किं मञ्ञसि, महाराज, येसं नच्छिन्ना हत्थपादा, जानेय्युं ते, महाराज, दुक्खं हत्थपादच्छेदनं"ति ?

"आम, भन्ते, जानेय्युं"ति ।

"कथं जानय्युं"ति ?

"अञ्ञेसं, भन्ते, छिन्नहत्थपादानं परिदेवितसद्दं सुत्वा जानन्ति 'दुक्खं हत्थपादछेदनं'"ति ।

"एवमेव खो, महाराज, येसं दिट्ठं निब्बानं तेसं सद्दं सुत्वा जानाति 'सुखं निब्बानं'"ति ।

"कल्लो'सि, भन्ते नागसेना"ति ।

चतुत्थो वग्गो

## ६—बुद्धस्स अत्थिभावो

राजा आह—"भन्ते नागसेन, बुद्धो तया दिट्ठो"ति ?

"न हि, महाराजा"ति ।

"अथ ते आचरियेहि बुद्धो दिट्ठो"ति ?

"न हि, महाराजा"ति ।

"तेन हि, भन्ते नागसेन, न'त्थि बुद्धो"ति !

"किं पन, महाराज, हिमवति ऊहा नदी तया दिट्ठा"ति ?

"न हि, भन्ते"ति ।

"अथ ते पितरा ऊहा नदी दिट्ठा"ति ?

"न हि, भन्ते"ति ।

"तेन हि, महाराज, न'त्थि ऊहा नदी"ति ?

"अत्थि, भन्ते, किञ्चा'पि मया ऊहा नदी न दिट्ठा पितरा पि मे ऊहा नदी न दिट्ठा अपि च अत्थि ऊहा नदी"ति ।

"तत्कि मन्यसे, महाराज, येषां न छिन्ना हस्तपादाः, जानीयुस्ते, महाराज, न दुःखं हस्तपादच्छेदनमि"ति ?

"आम् भदन्त, जानीयुरि"ति ।

"कथं जानीयु"रिति ?

"अन्येषां, भदन्त, छिन्नहस्तपादानां परिदेवितशब्दं, श्रुत्वा जानाति 'दुःखं हस्तपादच्छेदनमि'"ति ।

"एवमेव खलु, महाराज, येषा दृष्टं निर्वाणं तेषां शब्दं श्रुत्वा जानाति 'सुखं निर्वाणमि"ति ।'

"कल्योऽसि, भदन्त नागसेने"ति ।

चतुर्थो वर्गः

६—बुद्धस्यास्तिभावः

राजाऽऽह–"भदन्त नागसेन, बुद्धस्त्वया दृष्टः"इति ?

"न हि, महाराजे"ति ।

"अथ त आचार्यैर्बुद्धो दृष्ट"इति ?

"न हि, महाराजे"ति ।

"तेन हि, भदन्त नागसेन, नास्ति बुद्ध"इति !

"किम्पुनर्महाराज, हिमवति ऊहा नदी त्वया दृष्टे"ति ?

"न हि, भदन्ते"ति ।

"अथ ते पित्रा ऊहा नदी दृष्टे"ति ?

"न हि, भदन्ते' ति ।

"तेन हि, महाराज, नास्ति ऊहा नदी"ति ।

"अस्ति, भदन्त, किञ्चापि मे ऊहा नदी न दृष्टा, पित्रापि मे ऊहा नदी न दृष्टा; अपि चास्ति ऊहा नदी"ति ।

"एवमेव खो, महाराज, किंचा'पि मया भगवा न दिट्ठो, आचरियेहि पि मे भगवा न दिट्ठो; अपि च अत्थि भगवा''ति।

"कल्लो'सि, भन्ते नागसेना"ति।

१०—भगवा अनुत्तरो

राजा आह—भन्ते नागसेन, बुद्धो अनुत्तरो''ति ?

"आम, महाराज, भगवा अनुत्तरो''ति।

"कथं भन्ते नागसेन, अदिट्ठपुब्बं जानासि बुद्धो अनुत्तरो''ति?

"तं कि मञ्ञसि, महाराज, येहि अदिट्ठपुब्बो महासमुद्दो जानेय्युं ते, महाराज, महन्तो खो महासमुद्दो गम्भीरो अप्पमेय्यो दुप्परियोगाहो, यत्थि'मा पञ्च महानदियो सततं समितं अप्पेन्ति, सेय्यथीदं—गङ्गा, यमुना, अचिरवती, सरभू, मही। नेव तस्स ऊनत्तं वा पूरत्तं वा पञ्ञायती''ति।

"आम, भन्ते, जानेय्युं''ति।

"एवमेव खो, महाराज, सावके महन्ते परिनिब्बुते पस्सित्वा जानामि भगवा अनुत्तरो''ति।

"कल्लो'सि, भन्ते नागसेना''ति।

११—भगवतो अनुत्तरभावस्स ञाणं

राजा आह—"भन्ते नागसेन, सक्का जानितुं बुद्धो अनुत्तरो''ति ?

"आम, महाराज, सक्का जानितुं भगवा अनुत्तरो''ति।

"कथं, भन्ते नागसेन, सक्का जानितुं बुद्धो अनुत्तरो''ति ?

"भूतपुब्बं, महाराज, तिस्सत्थेरो नाम लेखाचरियो अहोसि। बहूनि वस्सानि अब्भतीतानि कालङ्कतस्स, कथं सो ञायती''ति ?

"लेखेन, भन्ते''ति।

"एवमेव खलु, महाराज, किञ्चापि मया भगवान्न दृष्टः, आचार्यैरपि मे भगवान् न दृष्टः; अपि चास्ति भगवानि"ति।

"कल्योऽसि, भदन्त नागसेने"ति।

## १०—भगवाननुत्तरः

राजाऽऽह—"भदन्त नागसेन, बुद्धोऽनुत्तर"इति ?

"आम्, महाराज, भगवाननुत्तर"इति।

"कथं, भदन्त नागसेन, अदृष्टपूर्वं जानासि बुद्धोऽनुत्तर"इति ?

"तत्किं मन्यसे, महाराज, यैरदृष्टपूर्वो महासमुद्रः, जानीयुस्ते, महाराज, महान् खलु महासमुद्रो गम्भीरोऽप्रमेयो दुष्पर्यवगाहः, यत्रेमा पञ्च महानद्यः सततं समितमर्पयन्ति, तद् यथा—गङ्गा, यमुना, अजिरवती, सरयूः, मही। नैव तस्योनत्वं वा पूरत्वं वा प्रज्ञायत"इति ?

"आम्, भदन्त, जानीयुरि"ति।

"एवमेव खलु, महाराज, श्रावकान् महतः परिनिर्वृतान् दृष्ट्वा जानामि भगवाननुत्तर"इति।

"कल्योऽसि, भदन्त नागसेने"ति।

## ११—भगवतोऽनुत्तरभावस्य ज्ञानम्

राजाऽऽह—"भदन्त नागसेन, शक्यं ज्ञातुं बुद्धोऽनुत्तर"इति ?

"आम्, महाराज, शक्यं ज्ञातुं भगवाननुत्तर"इति।

"कथं, भदन्त नागसेन, शक्यं ज्ञातुं बुद्धोऽनुत्तर"इति ?

"भूतपूर्वं, महाराज, तिष्यस्थविरो नाम लेखाचार्योऽभूत्। बहूनि वर्षाण्यभ्यतीतानि कालं कृतस्य, कथं स ज्ञायत"इति ?

"लेखेन, भदन्ते"ति।

"एवमेव खो, महाराज, यो धम्मं पस्सति सो भगवन्तं पस्सति । धम्मो, हि महाराज, भगवता देसितो"ति ।

"कल्लो'सि, भन्ते नागसेना"ति ।

### १२—धम्मो दिट्ठो

राजा आह—"भन्ते नागसेन, धम्मो तया दिट्ठो"ति ?

"बुद्धनेत्तिया, खो, महाराज, बुद्धपञ्ञत्तिया यावजीवं सावकेहि वत्तितब्बं"ति ।

"कल्लो'सि, भन्ते, नागसेना"ति ।

### १३—न च सङ्कमति पटिसन्दहति च

राजा आह—"भन्ते नागसेन, न च सङ्कमति पटिसन्दहति चा"ति ?

"आम, महाराज, न च सङ्कमति पटिसन्दहति चा"ति ।

"कथं, भन्ते नागसेन, न च सङ्कमति पटिसन्दहति च ? १–ओपम्मं करोही"ति ।

"यथा, महाराज, कोचिदेव पुरिसो पदीपतो पदीपं पदीपेय्य, किं नु खो सो, महाराज, पदीपो पदीपम्हा सङ्कन्तो"ति ?

"न हि, भन्ते"ति ।

"एवमेव खो, महाराज, न च सङ्कमति पटिसन्दहति चा"ति ।

२–"भिय्यो ओपम्मं करोही"ति ।

"अभिजानासि नु त्वं, महाराज, दहरको सन्तो सिलोकाचरियस्स सन्तिके किञ्चि सिलोकं गहितं"ति ?

"आम, भन्ते"ति ।

"किं नु खो, महाराज, सो सिलोको आचरियम्हा सङ्कन्तो"ति?

"न हि, भन्ते"ति ।

"एवमेव खलु, महाराज, यो धर्मं पश्यति स भगवन्तं पश्यति। धर्मो हि, महाराज, भगवता देशित"इति।

"कल्योऽसि, भदन्त नागसेने"ति।

१२—धर्मो दृष्टः

राजाऽऽह--"भदन्त नागसेन, धर्मस्त्वया दृष्ट"इति ?

"बुद्धनीत्या खलु, महाराज, बुद्धप्रज्ञप्त्या यावज्जीवं श्रावकैर्वर्तितव्यमि"ति।

"कल्योऽसि, भदन्त नागसेने"ति।

१३—न च सङ्क्रामति प्रतिसन्दधाति च

राजाऽऽह--"भदन्त नागसेन, न च सङ्क्रामति प्रतिसन्दधाति चे"ति ?

"आम्, महाराज, न च सङ्क्रामति प्रतिसन्दधाति चे"ति।

"कथं, भदन्त नागसेन, न च सङ्क्रामति प्रतिसन्दधाति च ? १–औपम्यं कुर्वि"ति।

"यथा, महाराज, कश्चिदेव पुरुषः प्रदीपतः प्रदीपं प्रदीपयेत्, किन्नु खलु स, महाराज, प्रदीप प्रदीपात् सङ्क्रान्त"इति ?

"न हि, भदन्ते"ति।

"एवमेव खलु, महाराज, न च सङ्क्रामति प्रतिसन्दधाति चे"ति।

२–"भूय औपम्यं कुर्वि"ति।

"अभिजानासि नु त्वं, महाराज, दारकः सन् श्लोकाचार्यस्यान्तिके कश्चिच्छ्लोको गृहीत"ति ?

"आम्, भदन्ते"ति।

"किन्नु खलु, महाराज, स श्लोक आचार्यात् सङ्क्रान्त"इति ?

"न हि, भदन्ते"ति।

"एवमे'व खो, महाराज, न च सङ्कमति पटिसन्दहति चा"ति।

"कल्लो'सि, भन्ते नागसेना"ति।

१४—वेदगू नूपलब्भति

राजा आह—"भन्ते नागसेन, वेदगू उपलब्भती"ति ? थेरो आह—"परमत्थेन खो, महाराज, वेदगू नू'पलब्भती"ति।

"कल्लो'सि, भन्ते नागसेना"ति।

१५—भवन्तरे न किञ्चि सङ्कमति

राजा आह—"भन्ते नागसेन, अत्थि कोचि सत्तो यो इमम्हा काया अञ्ञं कायं सङ्कमती"ति ?

"न हि, महाराजा"ति।

"यदि, भन्ते नागसेन, इमम्हा काया अञ्ञं कायं सङ्कमन्तो नत्थि, ननु मुत्तो भविस्सति पापकेहि कम्मेही"ति ?

"आम, महाराज, यदि न पटिसन्दहेय्य, मुत्तो भविस्सति पापकेहि कम्मेही'ति। यस्मा च खो, महाराज, पटिसन्दहति, तस्मा न परिमुत्तो पापकेहि कम्मेही"ति।

१—"ओपम्मं करोही"ति।

"यथा, महाराज, कोचिदे'व पुरिसो अञ्ञतरस्स पुरिसस्स अम्बं अवहरेय्य। किं सो दण्डप्पत्तो भवेय्या"ति ?

"आम, भन्ते, दण्डप्पत्तो भवेय्या"ति।

"न खो सो, महाराज, तानि अम्बानि अवहरि, यानि तेन रोपितानि। कस्मा दण्डप्पत्तो भवेय्या"ति ?

"तानि, भन्ते, अम्बानि निस्साय जातानि। तस्मा दण्डप्पत्तो भवेय्या"ति।

"एवमेव खलु, महाराज, न च सङ्क्रामति प्रतिसन्दधाति चे"ति ।

"कल्योऽसि, भदन्त नागसेने"ति ।

### १४—वेदको नोपलभ्यते

राजाऽऽह—"भदन्त नागसेन, वेदक उपलभ्यत"इति ? स्थविर आह—"परमार्थेन खलु, महाराज, वेदको नोपलभ्यत"इति ।

"कल्योऽसि, भदन्त नागसेने"ति ।

### १५—भवान्तरे न किञ्चित सङ्क्रामति

राजाऽऽह—"भदन्त नागसेन, अस्ति कश्चित् सत्त्वो योऽस्मात् कायादन्यं कायं सङ्क्रामती"इति ?

"न हि, महाराजे"ति ।

"यदि, भदन्त नागसेन, अस्मात् कायादन्यं कायं सङ्क्रामत् नास्ति, ननु मुक्तो भविष्यति पापकैः कर्मभिरि"ति ?

"आम, महाराज, यदि न प्रतिसन्दध्यात्, मुक्तो भविष्यति पापकैः कर्मभिरिति । यस्माच्च खलु, महाराज, प्रतिसन्दधाति, तस्मान्न परिमुक्तः पापकैः कर्मभिरि"ति ।

१—"औपम्यं कुर्वि"ति ।

"यथा, महाराज, कश्चिदेव पुरुषोऽन्यतरस्य पुरुषस्याम्रमवहरेत् । किं स दण्डप्राप्तो भवेदि"ति ?

"आम, भदन्त, दण्डप्राप्तो भवेदि"ति ।

"न खलु स, महाराज, तान्याम्राण्यवाहार्षीत्, यानि तेन रोपितानि । कस्माद् दण्डप्राप्तो भवेदि"ति ?

"तानि, भदन्त, आम्राणि निःश्रित्य जातानि । तस्माद् दण्डप्राप्तो भवेदि"ति ।

"एवमेव खो, महाराज, इमिना नामरूपेन कम्मं करोति सोभनं वा असोभनं वा, तेन कम्मेन अञ्ञं नामरूपं पटिसन्दहति, तस्मा न परिमुत्तो पापकेहि कम्मेही"ति ।

"कल्लो'सि, भन्ते नागसेना"ति ।

१६—कुहिं तानि कम्मानि तिट्ठन्ति

राजा आह—"भन्ते नागसेन, इमिना नामरूपेन कम्मं कतं कुसलं वा अकुसलं वा, कुहि तानि कम्मानि तिट्ठन्ती"ति ?

"अनुबन्धेय्युं खो, महाराज, तानि कम्मानि छाया व अनपायिनो"ति ।

"सक्का पन, भन्ते, तानि कम्मानि दस्सेतुं 'इध वा इध वा तानि कम्मानि तिट्ठन्ती'"ति ?

"न सक्का, महाराज, तानि कम्मानि दस्सेतुं, इध वा इध वा तानि कम्मानि तिट्ठन्ती"ति ।

१—"ओपम्मं करोही"ति ।

"तं किं मञ्ञसि, महाराज, यानि'मानि रुक्खानि अनिब्बत्तफलानि, सक्का तेसं फलानि दस्सेतुं, इध वा इध वा तानि फलानि तिट्ठन्ती"ति ?

"न हि, भन्ते"ति ।

"एवमेव खो, महाराज, अब्भोच्छिन्नाय सन्ततिया न सक्का तानि कम्मानि दस्सेतुं 'इध वा इध वा तानि कम्मानि तिट्ठन्ती'"ति।

"कल्लो'सि, भन्ते नागसेना"ति ।

१७—उप्पत्तिञाणं

राजा आह—"भन्ते नागसेन, यो उप्पज्जति जानाति सो 'उप्पज्जिस्सामी'"ति ?

"एवमेव खलु, महाराज, अनेन नामरूपेण कर्म करोति शोभनं वाऽशोभनं वा, तेन कर्मणाऽन्यन्नामरूपं प्रतिसन्दधाति, तस्मान्न परिमुक्त पापकैः कर्मभिरि"ति ।

"कल्योऽसि, भदन्त नागसेने"ति ।

१६—कुतस्तानि कर्माणि तिष्ठन्ति

राजाऽऽह—"भदन्त नागसेन, अनेन नामरूपेण कर्म कृतं कुशलं वाऽकुशलं वा, कुतस्तानि कर्माणि तिष्ठन्ती"ति ?

"अनुबध्नीयुः खलु, महाराज, तानि कर्माणि छायेवानपायिनी"ति ।

"शक्यानि पुनर्भदन्त, तानि कर्माणि दर्शयितुं 'इह वा इह वा तानि कर्माणि तिष्ठन्ती'"ति ?

"न शक्यानि, महाराज, तानि कर्माणि दर्शयितुं 'इह वा इह वा तानि कर्माणि तिष्ठन्ती'" ति ।

१—"औपम्यं कुरु"ति ।

"तत्किं मन्यसे, महाराज, य इमे वृक्षा अनिर्वृत्तफलाः, शक्यानि तेषां फलानि दर्शयितुं 'इह वा इह वा तानि फलानि तिष्ठन्ती'"ति ?

"न हि, भदन्ते"ति ।

"एवमेव खलु, महाराज, अभ्यवच्छिन्नाया सन्ततौ न शक्यानि तानि कर्माणि दर्शयितुं 'इह वा इह वा तानि कर्माणि तिष्ठन्ती'"ति ।

"कल्योऽसि, भदन्त नागसेने"ति ।

१७—उत्पत्तिज्ञानम्

राजाऽऽह—"भदन्त नागसेन, य उत्पद्यते जानाति 'उत्पत्स्य इति ?

"आम,महाराज ,यो उपज्जति जानाति सो'उपज्जिस्सामि"'ति।

१–"ओपम्मं करोही"ति ।

"यथा, महाराज, कस्सको गहपतिको बीजानि पथवियं निक्खिपित्वा सम्मा देवे वस्सन्ते जानाति धञ्ञं निब्बत्तिस्सती"ति ?

"आम, भन्ते, जानेय्या"ति ।

"एवमेव खो, महाराज, यो उप्पज्जति जानाति सो उप्पज्जिस्सामी"'ति ।

"कल्लो'सि, भन्ते नागसेना"ति ।

१८—अनुपादिसेसा निब्बानधातु

राजा आह–"भन्ते नागसेन, बुद्धो अत्थी"ति ?

"आम, महाराज, भगवा अत्थी"ति ।

"सक्का पन,भन्ते नागसेन,बुद्धो निदस्सेतुं,'इध वा इध वा'"ति।

"परिनिब्बुतो, महाराज, भगवा अनुपादिसेसाय निब्बानधातुया । न सक्का भगवा निदस्सेतुं 'इध वा इध वा'"ति ।

१–"ओपम्मं करोही"ति ।

"तं किं मञ्ञसि,महाराज,महतो अग्गिक्खन्धस्स जलमानस्स या अच्चि अत्थङ्गता सक्का सा अच्चि दस्सेतुं 'इध वा इधा'"ति ?

"न हि, भन्ते, निरुद्धा सा अच्चि अप्पञ्ञत्ति गता"ति ।

"एवमे'व खो, महाराज, भगवा अनुपादिसेसाय निब्बानधातुया परिनिब्बुतो अत्थङ्गतो, न सक्का भगवा निदस्सेतुं, 'इध वा इध वा'ति । धम्मकायेन पन खो, महाराज, सक्का भगवा निदस्सेतुं । धम्मो हि, महाराज, भगवता देसितो"ति ।

"कल्लो'सि, भन्ते नागसेना"ति ।

पञ्चमो वग्गो

"आम्, महाराज, य उत्पद्यते जानाति स 'उत्पत्स्य'"इति ।

१–"औपम्यं कुर्वि"ति ।

"यथा, महाराज, कृषको गृहपतिको बीजानि पृथिव्यां निक्षिप्य सम्यग् देवे वर्षति जानाति 'धान्यं निर्वर्त्स्यती'"ति ?

"आम्, भदन्त, जानीयादि"ति ।

"एवमेव खलु, महाराज, य उत्पद्यते जानाति स 'उत्पत्स्य"इति ।

"कल्योऽसि, भदन्त नागसेने"ति ।

### १८—अनुत्पादिशेषो निर्वाणधातुः

राजाऽऽह–"भदन्त नागसेन, बुद्धोऽस्ती"ति ?

"आम्, महाराज, भगवानस्ती"ति ।

"शक्यः पुनर्भदन्त नागसेन, बुद्धो निदर्शयितुं 'इह वेह वे'"ति ?

"परिनिर्वृतो, महाराज, भगवाननुत्पादिशेषेण निर्वाणधातुना । न शक्यो भगवान् निदर्शयितुं 'इह वेह वे'"ति ।

१–"औपम्यं कुर्वि"ति ।

"तत् किं मन्यसे, महाराज, महतोऽग्निस्कन्धस्य ज्वलतो यार्चिरस्तङ्गता शक्या साऽर्चिर्दर्शयितुं 'इह वेह वा'"ति ?

"न, हि भदन्त, निरुद्धा साऽर्चिरप्रज्ञप्तिं 'गते'"ति ।

"एवमेव खलु, महाराज, भगवाननुत्पादिशेषेण निर्वाणधातुना परिनिर्वृतोऽस्तङ्गतः, न शक्यो निदर्शयितुं 'इह वेह वे'ति । धर्मकायेन पुन खलु, महाराज, शक्यो भगवान् निदर्शयितुम् । धर्मो हि, महाराज, भगवता देशित"इति ।

"कल्योऽसि, भदन्त नागसेने"ति ।

पञ्चमो वर्गः

## १९—अयं कायो वणूपमो

राजा आह—"भन्ते नागसेन, पियो पब्बजितानं कायो"ति ?

"न खो, महाराज, पियो पब्बजितानं कायो"ति ?

"अथ किस्स नु खो भन्ते केलायथ ममायथा"ति ।

"किं पन ते, महाराज, कदाचि करहचि सङ्गामगतस्स कण्डप्पहारो होती"ति ?

"आम, भन्ते, होती"ति ।

"किं नु खो, महाराज, सो वणो आलेपेन च आलिम्पीयति तेलेन च मक्खीयति सुखुमेन च चोळपट्टेन पलिवेठीयती"ति ?

"आम, भन्ते, आलेपेन च आलिम्पीयति तेलेन च मक्खीयति सुखुमेन च चोळपट्टेन पलिवेठीयती"ति ।

"किं नु खो, महाराज, पियो ते वणो, तेन आलेपेन च आलिम्पीयति तेलेन च मक्खीयति सुखुमेन च चोळपट्टेन पलिवेठीयती"ति ?

"न मे, भन्ते, पियो वणो, अपि च मंसस्स रुहनत्थाय आलेपेन च आलिम्पीयति, तेलेन च मक्खीयति, सुखुमेन च चोळपट्टेन पलिवेठीयती"ति ।

"एवमे'व खो, महाराज, अप्पियो पब्बजितानं कायो। अथ च पब्बजिता अनज्झोसिता कायं परिहरन्ति ब्रह्मचरियानुग्गहाय। अपि च खो, महाराज, वणू'पमो कायो वुत्तो भगवता। तेन पब्बजिता वणमिव कायं परिहरन्ति अनज्झोसिता। भासितं पेतं, महाराज, भगवता—

'अल्लचम्मप्पटिच्छन्नो नवद्वारो महावणो।
समन्ततो पग्घरति असुचि पूतिगन्धियो"ति ॥

"कल्लो'सि, भन्ते नागसेना"ति ।

१६—अयं कायो व्रणोपम.

राजाऽऽह—"भदन्त नागसेन, प्रियः प्रव्रजितानां काय"इति ?

"न खलु, महाराज, प्रियः प्रव्रजितानां काय"इति ।

"अथ कस्मान्नु खलु, भदन्त, केलायध्वं(?)ममायध्वमि"ति ?

"किम्पुनस्ते, महाराज, कदाचित् कर्हिचित् संग्रामगतस्य काण्डप्रहारो भवती"ति ?

"आम, भदन्त, भवती"ति ।

"किन्नु, खलु, महाराज, स व्रण आलेपेन चालिप्यते तैलेन च म्रक्ष्यते ( ? ) सूक्ष्मेण च चोलपट्टेन प्रतिवेष्ट्यत"इति ?

"आम, भदन्त, आलेपेन चालिप्यते तैलेन च म्रक्ष्यते सूक्ष्मेण च चोलपट्टेन प्रतिवेष्ट्यत"इति ।

"किन्नु खलु, महाराज, प्रियस्ते व्रण, येनालेपेन चालिप्यते तैलेन च म्रक्ष्यते सूक्ष्मेण च चोलपट्टेन प्रतिवेष्ट्यत"इति ?

"न मे, भदन्त, प्रियो व्रणः, अपि च मांसस्य रोहणार्थाय आलेपेन चालिप्यते, तैलेन च म्रक्ष्यते सूक्ष्मेण च चोलपट्टेन प्रतिवेष्ट्यत"इति ।

"एवमेव खलु, महाराज. अप्रियः प्रव्रजितानां काय.। अथ च प्रव्रजिता अनध्यवसिता कायं परिहरन्ति ब्रह्मचर्यानुग्रहाय । अपि च खलु, महाराज, व्रणोपमः काय उक्तो भगवता। तत्न प्रव्रजिता व्रणमिव कायं परिहरन्ति अनध्यवसिता.। भाषितमप्येतन्महाराज, भगवता——

आर्द्रचर्मप्रतिच्छन्नो नवद्वारो महाव्रणः ।
समन्ततः प्रक्षरति अशुचिः पूतिगन्ध"ति ॥

"कल्योऽसि, भदन्त नागसेने"ति ।

## २०—बुद्धो सब्बञ्ञू सब्बदस्सावी

राजा आह—"भन्ते नागसेन, बुद्धो सब्बञ्ञू सब्बदस्सावी"ति ?

"आम, महाराज, भगवा सब्बञ्ञू सब्बदस्सावी"ति ।

"अथ किस्स नु खो, भन्ते नागसेन, सावकानं अनुपुब्बेन सिक्खापदं पञ्ञापेसी"ति ?

"अत्थि पन ते, महाराज, कोचि वेज्जो यो इमिस्सं पठवियं सब्बभेसज्जानि जानाती"ति ?

"आम, भन्ते, अत्थी"ति ।

"किन्नु खो, महाराज, सो वेज्जो गिलानकं सम्पत्ते काले भेसज्जं पायेति, उदाहु असम्पत्ते काले"ति ?

"सम्पत्ते काले, भन्ते, गिलानकं भेसज्जं पायेति, नो असम्पत्ते काले"ति ।

"एवमेव खो, महाराज, भगवा सब्बञ्ञू सब्बदस्सावी न असम्पत्ते काले सावकानं सिक्खापदं पञ्ञापेति, सम्पत्ते काले सावकानं सिक्खापदं पञ्ञापेति यावजीवं अनतिक्कमनीयं"ति ।

"कल्लोसि, भन्ते नागसेना"ति ।

## २१—द्वत्तिंसमहापुरिसलक्खणानि

राजा आह—"भन्ते नागसेन, बुद्धो द्वत्तिंसमहापुरिसलक्खणेहि समन्नागतो असीतिया च अनुब्यञ्जनेहि परिरञ्जितो सुवण्णवण्णो कञ्चनसन्निभत्तचो ब्यामप्पभो"ति ?

"आम, महाराज, भगवा द्वत्तिंसमहापुरिसलक्खणेहि समन्नागतो, असीतिया च अनुब्यञ्जनेहि परिरञ्जितो, सुवण्णवण्णो, कञ्चनसन्निभत्तचो, ब्यामप्पभो"ति ।

## २०—बुद्धः सर्वज्ञः सर्वदर्शी

राजाऽऽह—"भदन्त नागसेन, बुद्धः सर्वज्ञः सर्वदर्शी"ति ?

"आम, महाराज, भगवान् सर्वज्ञः सर्वदर्शी"ति ।

"अथ कस्मान्नु खलु, भदन्त नागसेन, श्रावकाणामानुपूर्व्येण शिक्षापदं प्राजिज्ञपदि"ति ?

"अस्ति पुनस्ते, महाराज, कश्चिद् वैद्यो योऽस्या, पृथिव्या सर्वभैषज्यानि जानाती"ति ?

"आम, भदन्त, अस्ती"ति ।

"किन्नु खलु, महाराज, स वैद्यो ग्लानकं सम्प्राप्ते काले भैषज्यं पाययति, उताहो असम्प्राप्ते काल"इति ?

"सम्प्राप्ते काले, भदन्त, ग्लानकं भैषज्यं पाययति, नासम्प्राप्ते काल"इति ।

"एवमेव खलु, महाराज, भगवान् सर्वज्ञः सर्वदर्शी नासम्प्राप्ते काले श्रावकेभ्यः शिक्षापदं प्रज्ञापयति, सम्प्राप्ते काले श्रावकेभ्यः शिक्षापदं प्रज्ञापयति यावज्जीवमनतिक्रमणीयमि"ति ।

"कल्योऽसि, भदन्त नागसेने"ति

## २१—द्वात्रिंशन्महापुरुषलक्षणानि

राजाऽऽह—"भदन्त नागसेन, बुद्धो द्वात्रिंशन्महापुरुषलक्षणैः समन्वागतः अशीत्या चानुव्यञ्जनैः परिरञ्जितः, सुवर्णवर्णः काञ्चनसन्निभत्वक् व्यामप्रभ"इति ?

"आम, महाराज, भगवान् द्वात्रिंशन्महापुरुषलक्षणैः समन्वागतः, अशीत्या चाऽनुव्यञ्जनैः परिरञ्जितः, सुवर्णवर्णः, काञ्चनसन्निभत्वक्, व्यामप्रभ"इति ।

"किं पन'स्स, भन्ते, मातापितरो'पि द्वत्तिसमहापुरिसलक्खणेहि समन्नागता असीतिया च अनुब्यञ्जनेहि परिरञ्जिता सुवण्णवण्णा कञ्चनसन्निभत्तचा ब्यामप्पभा"ति ?

"नो च'स्स, महाराज, मातापितरो द्वत्तिसमहापुरिसलक्खणेहि समन्नागता असीतिया च अनुब्यञ्जनेहि परिरञ्जिता सुवण्णवण्णा कञ्चनसन्निभत्तचा ब्यामप्पभा"ति ।

"एवं सन्ते खो, भन्ते नागसेन, न उप्पज्जति बुद्धो द्वत्तिसमहापुरिसलक्खणेहि समन्नागतो, असीतिया च अनुब्यञ्जनेहि परिरञ्जितो सुवण्णवण्णो, कञ्चनसन्निभत्तचो, ब्यामप्पभो ति । अपि च मातुसदिसो वा पुत्तो होति मातुपक्खो वा, पितुसदिसो वा पुत्तो होति पितुपक्खो वा"ति । थेरो आह—"अत्थि पन, महाराज, किञ्चि पदुमं सतपत्तं"ति ?

"आम, भन्ते, अत्थी"ति ।

"तस्स पन कुहिं सम्भवो"ति ?

"कद्दमे जायति, उदके आसीयती"ति ।

"किन्नु खो, महाराज, पदुमं कद्दमेन सदिसं वण्णेन वा गन्धेन वा रसेन वा"ति ?

"न हि, भन्ते"ति ।

"अथ उदकेन सदिसं वण्णेन वा गन्धेन वा रसेन वा"ति ?

"न हि, भन्ते"ति ।

"एवमेव खो, महाराज, भगवा द्वत्तिसमहापुरिसलक्खणेहि समन्नागतो असीतिया च अनुब्यञ्जनेहि परिरञ्जितो, सुवण्णवण्णो, कञ्चनसन्निभत्तचो, ब्यामप्पभो ति । नो च'स्स मातापितरो द्वत्तिसमहापुरिसलक्खणेहि समन्नागता असीतिया

"किम्पुनरस्य, भदन्त, मातापितरावपि द्वात्रिंशन्महापुरुष-लक्षणैः समन्वागतौ अशीत्या चानुव्यञ्जनैः परिरञ्जितौ सुवर्णवर्णौ काञ्चनसन्निभत्वचौ व्यामप्रभावि"ति ?

"न चास्य, महाराज, मातापितरौ द्वात्रिंन्महापुरुषलक्षणैः समन्वागतौ अशीत्या चानुव्यञ्जनैः परिरञ्जितौ सुवर्णवर्णौ काञ्चनसन्निभत्वचौ व्यामप्रभावि"ति ।

"एवं सति खलु, भदन्त नागसेन, नोत्पद्यते बुद्धो द्वात्रिंश-न्महापुरुषलक्षणै समन्वागतः, अशीत्या चानुव्यञ्जनैः परिरञ्जितः, सुवर्णवर्ण, काञ्चनसन्निभत्वक्, व्यायप्रभ इति । अपि च मातृसदृशो वा पुत्रो भवति मातृपक्षो वा, पितृसदृशो वा पुत्रो भवति पितृपक्षो वे"ति । स्थविर आह—"अस्ति पुन-र्महाराज, किञ्चित् पद्मं शतपत्रमि"ति ?

"आम्, भदन्त, अस्ती"ति ।

"तस्य पुन कुत सम्भव"इति ?

"कर्दमे जायते, उदके आसीदती"ति ।

"किन्नु खलु, महाराज, पद्मं कर्दमेण सदृशं वर्णेन वा गन्धेन वा रसेन वे"ति ?"

"न हि, भदन्ते"ति ।

"अथोदकेन सदृशं वर्णेन वा गन्धेन वा रसेन वे"ति ?

"न हि, भदन्ते"ति ।

"एवमेव खलु, महाराज, भगवान् द्वात्रिंशन्महापुरुषलक्षणैः समन्वागतोऽशीत्या चानुव्यञ्जनैः परिरञ्जितः, सुवर्ण-वर्णः, काञ्चनसन्निभत्वक्, व्याभप्रभ इति । न चास्य माता-पितरौ द्वात्रिंशन्महापुरुषलक्षणैः समन्वागतौ अशीत्या

च अनुब्यञ्जनेहि परिरञ्जिता सुवण्णवण्णा कञ्चनसन्निभत्तचा ब्यामप्पभा''ति ।

''कल्लो'सि, भन्ते नागसेना''ति ।

२२—भगवा ब्रह्मचारी

राजा आह––''भन्ते नागसेन, बुद्धो ब्रह्मचारो''ति ?

''आम, महाराज, भगवा ब्रह्मचारी''ति ।

''तेन हि, भन्ते नागसेन, बुद्धो ब्रह्मुनो सिस्सो''ति ?

''अत्थि पन ते, महाराज, हत्थपामोक्खो''ति ?

''आम्, भन्ते, अत्थी''ति ।

''किं नु खो, महाराज, सो हत्थी कदाचि करहचि कोञ्च-नादं नदती''ति ?

''आम, भन्ते, नदती''ति ।

''तेन हि, महाराज, सो हत्थी कोञ्चसकुणस्स सिस्सो''ति ।

''न हि, भन्ते''ति ।

''किं पन, महाराज, ब्रह्मा सबुद्धिको अबुद्धिको''ति ?

''सबुद्धिको, भन्ते''ति ।

''तेन हि, महाराज, ब्रह्मा भगवतो सिस्सो''ति ।

''कल्लो'सि, भन्ते नागसेना''ति ।

२३—बुद्धस्स उपसम्पदा

राजा आह––''भन्ते नागसेन, उपसम्पदा सुन्दरा''ति ?

''आम, महाराज, उपसम्पदा सुन्दरा''ति ।

''अत्थि पन भन्ते बुद्धस्स उपसम्पदा, उदाहु नत्थी''ति ?

''उपसम्पन्नो खो, महाराज, भगवा बोधिरुक्खमूले सह सब्बञ्ञुतञाणेन, न'त्थि भगवतो उपसम्पदा अञ्ञेहि दिन्ना। यथा

चानुव्यञ्जनैः परिरञ्जितौ सुवर्णवर्णौ काञ्चनसन्निभत्वचौ व्यामप्रभावि''ति ।

''कल्योऽसि, भदन्त नागसेने''ति ।

### २२—भगवान ब्रह्मचारी

राजाऽऽह—''भदन्त नागसेन, बुद्धो ब्रह्मचारी''ति ?

''आम्, महाराज, भगवान् ब्रह्मचारी''ति ।

''तेन हि, भदन्त नागसेन, बुद्धो ब्रह्मणः शिष्य''इति ?

''अस्ति पुनस्ते, महाराज, हस्तिप्रमुख''इति ?

''आम्, भदन्त, अस्ती''ति ।

''किन्नु खलु, महाराज, स हस्ती कदाचित् कर्हिचित् क्रौञ्चनादं नदती''ति ?

''आम्, भदन्त, नदती''ति ।

''तेन हि, महाराज, स हस्ती क्रौञ्चशकुनस्य शिष्य''इति ?

''न हि, भदन्ते''ति ।

''किम्पुनर्महाराज, ब्रह्मा सबुद्धिकोऽबुद्धिक''इति ?

''सबुद्धिको, भदन्ते''ति ।

''तेन हि, महाराज, ब्रह्मा भगवतः शिष्य''इति ।

